वय वर्षे ५० ते १०० या वर्षांत एकूण ११ शांती कराव्यात असे या ग्रंथात दिलेले आहे. सर्वसामान्यपणे सर्व शांती सारख्याच प्रकाराच्या असतात. प्रामुख्याने संकल्प करताना वयाचा उल्लेख बदलतो. तसेच शांतीची देवता, मंत्र, हवनीय द्रव्ये, हवनसंख्या, उपदेवता, नक्षत्रदेवता इत्यादी बदलतात.

यजमानाने स्वतः (पत्नीसह) बसून संकल्प सोडावयाचा असतो. गणपती पूजन आणि पुण्याहवाचनादि झाल्यावर शांतिकर्म चालविण्यासाठी आपल्या गुरुजींना सुपारी म्हणजे अधिकार द्यावयाचा असतो. यालाच याज्ञिकामध्ये 'वर्ण' देणे असे म्हणतात. पुढील कार्य गुरुजी आणि त्यांचे ४/५ साहाय्यक गुरुजी हे करतात.

प्रथम पंचगव्य, मोहरी इत्यादीकांनी शांतीच्या जागेची शुद्धी व पुरुषसूक्त इत्यादीकांनी आपल्या, म्हणजे स्वतः गुरुजींच्या, देहाची शुद्धी करतात. नंतर देवतास्थापना, अग्निस्थापना, (ज्या शांतीमध्ये ज्याप्रमाणे सांगितले असेल त्याप्रमाणे तसे) करतात. देवतापूजन इत्यादी करून मग हवनाला प्रारंभ करतात. हवन झाल्यावर यजमानाला काही वैदिक मंत्र, सूक्ते आयुष्य वर्धनार्थ व आरोग्यासाठी ऐकवितात. ही सूक्ते वेगवेगळ्या शांतींच्या वेळी वेगवेगळी नाहीत. यानंतर काही हविर्द्रव्यांतून जो थोडा थोडा शिल्लक ठेवलेला भाग असतो तो सर्व एकत्रित करून गुरुजी त्याची एक आहुती देतात. यालाच स्विष्टकृत असे म्हणतात. कोणत्या हविर्द्रव्यातून शिल्लक भाग ठेवायचा व कोणत्यात ठेवायचा नाही हे पूर्वाचार्यांनी ठरवून दिलेले आहे. यानंतर प्रायश्चित्तहोम करण्यात येतो. तो झाल्यावर यजमानाला बसवून व अन्य देवता प्रीत्यर्थ क्षेत्रपालबळी देऊन व त्याची पूजा करवून कुटुंबातील मंडळींच्या अंगावरून ओवाळून काढला जातो. मग शांती सूक्त म्हणतात. ते झाल्यावर यजमानाच्या हातून पूर्णाहुती दिली जाते. ती देऊन झाल्यावर होमाचे राहिलेले उत्तरांग, स्थापितदेवतांची उत्तरपूजा इत्यादी झाल्यावर गुरुजी त्या देवतांच्या कलशोदकांनी व इतर अभिमंत्रित केलेल्या जलांनी यजमान व सर्व कुटुंबीय यांच्यावर अभिषिंचन करतात. अभिषेक संपल्यानंतर यजमानाने नूतनवस्त्र धारण करून (दुसरे वस्त्र नेसून) होमाजवळ बसावे.

अग्निदेवता इत्यादींची प्रार्थना करून होमविभूती धारण करावी. आयुष्याच्या वाढीसाठी आणि आरोग्य मिळावे म्हणून दूध प्यावे. आज्य–कांस्यपात्रात (काशाच्या वाटीत पातळ तूप घेऊन) स्वतःचे मुखावलोकन करावे. नंतर गुरुजींना पीठदान, दशदान इत्यादी दाने द्यावीत. नंतर यजमानाच्या मुलांनी अथवा मुलींनी यजमानांना पुष्पमाला, वस्त्रे, भेटी इत्यादी देऊन त्यांचा सन्मान करावा व ५, ७ अथवा १० सुवासिनींनी जितकी वय वर्षे तितके दीप घेऊन ओवाळावे. यजमानाला सर्वांनी दीर्घायुष्य आणि अखंड आरोग्य चिंतून शांतीची समाप्ती करावी. ब्राह्मण-भोजनाचा संकल्प करून नंतर दक्षिणा द्यावी व आशीर्वाद घ्यावा. सर्व कर्म पूर्ण झाल्यावर यजमानाने श्रीविष्णूचे तीन वेळा स्मरण करावे. (प्रार्थना करावी.)

अनुक्रमणिका

देवतास्तवनम् निवेदनं च।		३
अल्पनिवेदन		५
वयोऽवस्थाशान्तिविचारः।		७
यो यच्छ्रद्धः स एव सः।		९
सर्व शांतींचा सर्वसामान्य विधी		१२
सर्व शांतींची सर्वसामान्य सामानाची यादी		१३
नक्षत्र, नक्षत्रदेवता व त्यांचे नाममंत्र		१४
वैष्णवी शांतिः।	५० व्या वर्षी	१७
वारुणी शांतिः।	५५ व्या वर्षी	२१
उग्ररथ-शांतिः।	६० व्या वर्षी	२८
ब्रह्मादि मंडल देवता पूजास्थाने		३१
मृत्युंजय-महारथी शांतिः।	६५ व्या वर्षी	३२
भैमरथी शांतिः।	७० व्या वर्षी	३८
ऐन्द्री शांति।	७५ व्या वर्षी	४३
सहस्रचंद्रदर्शन-शांतिः।	८० व्या वर्षी	४८
रौद्री शांतिः।	८५ व्या वर्षी	५३
कालस्वरूपसौरी शांतिः।	९० व्या वर्षी	५७
त्र्यंबकमहारथी शांतिः।	९५ व्या वर्षी	६१
शताब्दी-महामृत्युंजय-शांतिः।	१०० व्या वर्षी	६५
ब्रह्मादि मंडल देवता		७१
सप्तचिरंजीव-प्रार्थना-श्लोकाः।		७२
श्रवणीयसूक्तानि।		७३
अभिषेकसूक्तानि।		७८
आज्यावलोकन मंत्रः।		८८

© केशव भिकाजी ढवळे

पहिली आवृत्ती : १९८३

पुनर्मुद्रणे : १९९०, १९९४, १९९९, २००२, २००५. सातवी आवृत्ती : २००८

प्रकाशक

ज्योती धनंजय ढवळे, केशव भिकाजी ढवळे,
पहिली भटवाडी, गिरगाव, मुंबई ४००००४.

मुद्रक

आंजनेय धनंजय ढवळे, समर्थ मुद्रणालय,
१३२-प्रगती इंड. इस्टेट,ना.म.जोशी मार्ग,मुंबई ११

॥ देवता-स्तवनम् निवेदनम् च ॥

॥ देवता-स्तवनम् ॥

ॐ देवीं वाचमजयन्त देवास्तां विश्वरूपाः पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥

ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

श्रीलक्ष्मीकेशवं नौमि दत्तात्रेयजनार्दनौ।
येषां कृपाप्रसादेन साफल्यं जन्मनो मम ॥१॥
जोशी नारायणाख्योऽहं वामनिश्चित्तपावनः।
आंजर्लेयग्रामवासी रत्नागिर्याख्यमण्डले ॥२॥
ब्रह्मणस्पतिसूक्तस्य विधानं प्राक् कृतं मया।
श्रीसूक्तस्य विधानं च श्रीलक्ष्मीशस्य तुष्टये ॥३॥
गणपत्यथर्वशीर्षस्य पुरश्चर्याविधिस्तथा।
वयोऽवस्थाऽख्यशांतीनां संग्रहोऽयमुदीर्यते ॥४॥
अत्रानुक्तं दुरुक्तं वा मतेर्मान्द्यात् श्रुतस्य च।
यद्भवेत्पूरणीयं च तद्विशोध्यं दयालुभिः ॥५॥

अल्पनिवेदन

शतायुर्वै पुरुषः । शतसंवत्सरं दीर्घमायुः ।

आयुष्य म्हणजे इहलोकात राहाण्याची कालमर्यादा, जीवनमर्यादा. ती पूर्वजन्मांतील सुकृत-दुष्कृत कर्मानुसार विधात्या परमेश्वराने गर्भावस्थेत असतानाच नियमित केलेली असते.

"आयुः कर्म च वित्तं च अन्नं मरणमेव च ।
पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥"

अर्थ–१ आयुः=आयुष्य, २ कर्म=उद्योगधंदा, ३ वित्तं=संपत्ती, द्रव्यलाभ, ४ अन्नं=अन्नऋणानुबंध, ५ मरण. या पाच गोष्टी गर्भावस्थेतच कोठे, कशा व केव्हा त्या ठरल्या आहेत. यालाच ललाटरेषा वा दैव म्हटले जाते. वेदाने मनुष्याची कलियुगातील आयुर्मर्यादा १०० वर्षे मानली आहे. तर काही ज्योतिषशास्त्रज्ञांनी १०८–१२० आयुर्मर्यादा ठरवून दशापद्धती लिहिली आहे. बृहज्जातककार–वराहमिहिराचार्य म्हणतो—

"समाः षष्टिर्द्विघ्नाः मनुजकरिणां पञ्च च निशा ।
हयानां द्वात्रिंशत् खरकरभयोः पञ्चककृतिः ॥
विरूपा साप्यायुर्वृषभमहिषोर्द्वादश शुनां ।
स्मृतं छागादीनां दशकसहिताः षट् परवयः ॥ १ ॥

अर्थ—मनुष्य व हत्ती वय	१२० वर्षे	
अश्व-घोडा वय	३२	„
खर-गर्दभ-उंट वय	२५	„
यात १ कमी–बैल, गायी–महिषी वय	२४	„
श्वान-कुत्रा वय	१२	„
छाग-शेळ्या-मेंढ्या वय	१०+६=१६	„

ही जास्तीत जास्त वयोमर्यादा दिलेली आहे. वेदवचनांनी प्रत्येक युगातील वयोमर्यादा भिन्न भिन्न सांगितली आहे. कलियुगातील मर्यादा शंभर वर्षे; पण ती सुद्धा उत्तरोत्तर कमी होत कलियुगाच्या चतुर्थ चरणात मनुष्याची जास्तीत जास्त २०–२५ वर्षे असेल असे भागवताच्या द्वादशस्कंधात सांगितले आहे. तात्पर्य, आयुष्य ही अमूल्य वस्तू आहे. "न लभ्यते कोटिभिः क्वापि।" कोट्यवधी रुपये

देऊन एक क्षणही कोठे मिळणार नाही. कच्च्या मातीच्या भांड्यात ठेवलेल्या पाण्याच्या नकळत होणाऱ्या पाझराप्रमाणे आयुष्याचा प्रत्येक क्षण नष्ट होत आहे हे मनुष्य विसरतो. म्हणूनच संतसज्जन–"घटका गेली, पळे गेली, तास वाजे झणाणा । आयुष्याचा नाश होतो राम कां रे म्हणाना ॥" असा सावधपणाचा उपदेश करतात, ईश्वरभक्ती करण्याचा उपदेश करतात. तर ऋषिमुनींनी सत्कर्म-सदाचरणाचा मार्ग सांगितला आहे. आयुष्याच्या बाल्य, तारुण्य, वार्धक्य अशा तीन अवस्था मुख्य कल्पिल्या आहेत. जन्मतः वय २५ पर्यंत बाल्य, ५० पर्यंत तारुण्य व पुढील आयुष्य वार्धक्य मानले तर काही ऋषिमुनींनी ३० वर्षांपर्यंत बाल्य, ६० पर्यंत तारुण्य व पुढील वार्धक्य मानले आहे. या तृतीयावस्थेत शरीराच्या ठिकाणी अनेक आघात–आजार, इंद्रिय–वैफल्य होण्याचा संभव असतो तो टाळावा. उर्वरित आयुष्य सुखाने जावे म्हणून वय पन्नासपासून दर पाच वर्षांनी तर काही ऋषींनी वय ६० पासून दर दहा वर्षांनी शांती सांगितल्या आहेत. त्यांना–"वयोऽवस्थाशांति" असे शौनकादिकांनी नाव दिले आहे. त्या अशा–वय ५० व्या वर्षी–वैष्णवी, ५५ व्या वर्षी–वारुणी, ६० व्या वर्षी–उग्ररथ, तिलाच "साठीशांती" असे म्हणतात. ६५ व्या वर्षी मृत्युंजय–महारथी, ७० व्या वर्षी–भैमरथी, ७५ व्या वर्षी–ऐन्द्री, ८० व्या वर्षी–चान्द्री, म्हणजे सहस्रचंद्रदर्शनशांती, ८५ व्या वर्षी–रौद्री, ९० व्या वर्षी–सौरी, ९५ व्या वर्षी–त्र्यंबक महारथी, १०० व्या वर्षी–महामृत्युंजय.

अशा एकूण वय ५० पासून १०० व्या वर्षापर्यंत दर पाच वर्षांनी अकरा शांती–भट्टभास्कर व शौनकादिकांनी सांगितल्या आहेत. साठाव्या वर्षी केल्या जाणाऱ्या उग्ररथ शांतीचा प्रयोग ऋग्वेदी ब्रह्मकर्मामध्ये आहे; पण वैष्णवी आदि-शांतीचा प्रयोग कोठेही छापलेला उपलब्ध नसल्यामुळे पौरोहित्य करणाऱ्या पुरोहित-वर्गाची फार कुचंबणा होते. मुंबई-पुण्यासारख्या शहरांतून या शांतीची माहिती असणारे-देणारे विद्वान कमी होत आहेत, हे लक्षात घेऊन "**वयोऽवस्थाभिध-एकादश-शान्तिसमुच्चयः ।**" नावाचा ग्रंथ प्रकाशित करीत आहोत. प्रत्येक प्रयोग संपूर्ण दिला असून त्या त्या शांतीच्या प्रारंभी "**प्रयोगदर्शन**" म्हणून थोडक्यात प्रयोगाची कल्पना दिली आहे. त्यावरून प्रयोगस्थदेवता-उपदेवता-हविर्द्रव्य-देवता-मंत्र-हवनसंख्या इत्यादि लक्षात येईल. उग्ररथशांति व भैमरथी शांतीची मूळवचने दिली आहेत. वयाच्या ८० व्या वर्षी सांगितलेल्या सहस्रचंद्र-दर्शनशांतीबद्दल अज्ञानाने कोणी ८० व्या वर्षी 'सहस्रचंद्रदर्शने होत नाहीत.'

म्हणून ही शांती ८१–८२ व्या वर्षी करावी असे सांगतात पण ते भ्रममूलक अज्ञान आहे असे शौनक स्पष्ट सांगतो. ८० वर्षारंभी सहस्रचंद्रदर्शने होतात व कशी होतात हे आम्ही स्वतंत्र "सहस्रचंद्रदर्शनविचार:" यात गणिताने सिद्ध केले आहे, हे अवश्य लक्षात घ्यावे.

आता परिस्थितीमुळे वा अनवधानाने या शांती त्या त्या वर्षी करणे अशक्य झाले तर गौणकाळी म्हणजे ५० ची ५१ व्या वर्षी, ६० ची ६१ व्या वर्षी, ८० ची ८१-८२ या वर्षी करण्यास हरकत नाही. हे पुढील "वयोऽवस्थाशांतिविचार:" या लेखात स्पष्ट केले आहे.

जन्मनक्षत्र देवता व तिचा नाममंत्र कोणता, हे स्वतंत्र कोष्टकात दिले आहे. सप्तचिरंजीव प्रार्थनेचे श्लोक, अभिषेक व वेदमंत्र-श्रवण याकरिता विहित असलेले मंत्र पुढे स्वतंत्र दिलेले आहेत. तात्पर्य, पौरोहित्य करणाऱ्या पुरोहितांना माहितीच्या दृष्टीने कोणतीच अडचण भासणार नाही, अशी दक्षता घेऊनच मी लेखन केले आहे. हे जरी खरे असले तरी वेळोवेळी प्रमाणवचनांसह प्रयोग-संकलनाचे मार्गदर्शन गुरुस्थानी असलेले कोल्हापुरस्थ पं. म. वि. ऊर्फ बंडोपंत धर्माधिकारी यांनी केले आहे. मी केवळ नाममात्र आहे. अर्थात—

गुरोरेव कृतिर्ह्येषा गुरोरेवं पदार्पिता ।
गुरुनावं समालम्ब्य प्रविष्टो वाङ्महोदधौ ॥
विद्वज्जनगरिष्ठा मां पारं नेतुं क्षमाः किल ॥

इत्यलम् । श्रीरस्तु । शुभं भवतु ।

विदुषामनुचरः **नारायण शास्त्री जोशी–आंजर्लेकर**
मु. पो. आंजर्ले, ता. दापोली,
जि. रत्नागिरी.

वयोऽवस्थाशांतिविचारः ।

"**शतायुर्वै पुरुषः**" इति श्रुतिं प्रमाणीकृत्य मनुष्याणां परमायुः शतं समा अस्तीति मत्वा तदर्धं पञ्चाशत् वर्षमारभ्य वयोऽवस्थाशांतयो विधेया इति एकं मतम् । तथा च अन्ये ज्यौतिषिकाः–"**नखाधिकशतं चायुः पुरुषाणां प्रकीर्तितम्**" इति लिंगपुराणवचनात्-विंशत्यधिकशतं आयुः मत्वा तदर्धं षष्टितमवर्षमारभ्य वयोऽवस्थाशांतयो विधेया इति मन्यन्ते । द्विविधस्याप्येतन्मतस्य प्रमाणपरिपुष्टत्वं अस्ति । ताश्च भट्टभास्करीयमतानुसारिण्यः वयोऽवस्थाशांतयः पञ्चाशत्वर्षमारभ्य– "पञ्चभिः पञ्चभिः वर्षैरुक्ताः" ।

यथा—"**वैष्णवी वारुणी चैव ततश्चोग्ररथी तथा ।
महारथी भीमरथी ऐन्द्री चैव विशेषतः ॥ १ ॥
चांद्री दार्शनिकी रौद्री सौरी मृत्युंजयी तथा ।
महामृत्युंजयी शांतिः क्रमशश्च प्रकीर्तिताः ॥ २ ॥
अरिष्टपरिहारार्थं शांतिं कुर्यात्प्रयत्नतः ॥**" इति ।

अत्र तत्तच्छांतीनां प्रधानदेवतानुसारमभिधानं कृतमस्ति । पञ्चाशत्वर्षे क्रियमाणायां **विष्णुः प्रधानः** अतः **वैष्णवीति** नाम । पञ्चपञ्चाशत्वर्षे क्रियमाणायां **वरुणः** प्रधानदेवतेति **वारुणीति** संज्ञा । षष्टितमे वर्षे उग्ररथः मार्कण्डेयः **प्रधानः** । सप्ततितमे वर्षे भीमरथः मृत्युंजयः । पञ्चसप्ततितमे इन्द्रः **कौशिकः** प्रधानः । ऐन्द्री **नाम** । अशीतिवर्षे चंद्रः इत्येवं सर्वत्र । अस्तु । वयोऽवस्थाशांतिषु ग्रहहोमे चत्वारि द्रव्याणि क्वचिदुक्तानि ।

"**चरुणा च समिद्भिश्च सर्पिषा च तिलैः क्रमात् ।
तत्तन्मंत्रैश्च होतव्या ग्रहाश्चैव विशेषतः ॥" इति ।**

अत्र चकारात् अधिदेवताः प्रत्यधिदेवताः सहितग्रहाः पूज्याः । अथ सर्वत्र होमे—

"**ग्रहाणां प्रथमं होमः ततः प्राधानिको भवेत् ।
ब्रह्मादीनां च देवानां अंते होमः प्रकीर्तितः ॥ १ ॥
ग्रहाणां पूर्वांगत्वात् प्रथमं होमः ततः प्रधानदेवतायाः ।**"
इति शांतिसारादौ ।

ब्रह्मादीनां नाम ब्रह्मादिमण्डलदेवानां चकारात् परिवारदेवताः सन्ति चेत् आवरणदेवताश्च तासां सर्वासां प्रधानहोमोत्तरं होमः सर्वत्र । अत्र वयोऽवस्थाशांतिषु पञ्चाशत्वर्षमारभ्य पञ्चभिः पञ्चभिः वर्षैः शांतय उक्ताः । अन्यमतेन–षष्टितमवर्षमारभ्य दशभिर्दशभिर्वर्षैः शांतय उक्ताः इति (६०-७०-८०-९०-१००) ।

तत्र यथारुचि, यथासंप्रदायं, शक्त्यनुसारं शांत्यनुष्ठानं कुर्वन्ति धार्मिकाः जनाः यदा च केनचिदन्तरायेण मुख्यकाले अनुष्ठानं कर्तुं न शक्यते तदा गौणकाले एकषष्टितमे द्विषष्टितमे वर्षे वा उग्ररथशांतिः कर्तव्या । यथा सप्ततिवर्षोत्तरं ७१-७२ तमे वर्षे भीमरथीशांतिः कर्तव्या । एवं सर्वत्र । तदुक्तं **मण्डनकारिकायां**—

"मुख्यकाले यदावश्यं कर्म कर्तुं न शक्यते ।
गौणकालेऽपि कर्तव्यं गौणोप्यत्रेदृशो भवेत् ॥"

ईदृशः स्वकालादुत्तरः कालो गौणोऽपि मुख्यसमः । यत्र गौणकालेप्यनुष्ठाने प्रायश्चित्तं नास्ति स गौणः मुख्यसदृशः इति आचाररत्नादौ स्पष्टम् ।

आसु वयोऽवस्थाशांतिषु उग्ररथशांतिः प्रधाना, तत्र सर्वांगोपदेशात् । तत्रस्थं "अग्निमीळेत्यादिसूक्तजपः अभिषेकः । सूक्तानि—आज्यावलोकनं दशदानादीनि । इत्यादि सर्वं तंत्रं समानम् । देवता हविर्द्रव्याणि च भिन्नरूपेण सन्ति । तत्र तत्र शांतिषु द्रष्टव्यानि" इत्यलम् । इति वयोऽवस्थाशांतिविचारः ।

इति पंडितवरेण्याः कोल्हापुरस्थाः
म. वि. (बंडोपंत) धर्माधिकारिणः ।

यो यच्छ्रद्धः स एव सः ।

अरिष्टांचे निवारण व्हावे म्हणून काही कृत्ये धार्मिक शास्त्रामध्ये विहित आहेत. त्यांना 'शांती' (म्हणजे ज्यायोगे अरिष्टे शांत होतात आणि मनातली अरिष्टाची धाकधूक नाहीशी झाल्यामुळे मन स्थिर राहून आत्मविश्वास वाढतो, म्हणजे वृत्ती शांत होतात म्हणून) म्हणतात. अरिष्टे ही दुष्ट स्वप्नांनी सूचित, आरोग्याचे अस्वास्थ्य, काही अनपेक्षित घटना, तसेच वाईट नक्षत्रावर जन्म इत्यादींमुळे येणार असे कळते. अर्थात काही अपाय होणार असे कळल्यावर किंवा वाटल्यावर त्याच्या निवारणाचा उपाय शोधणे, करणे हे ओघानेच आले. त्याबाबत—

यथा शस्त्रप्रहाराणां कवचं विनिवारकम् ।
तथा दैवोपघातानां शान्तिर्भवति वारणम् ॥

असे सांगितले आहे. म्हणजे असे शस्त्रप्रहारापासून चिलखताने रक्षण होते तसे दैवी संकटापासून शान्ति-विधि-कृत्य रक्षण करते.

मत्स्यपुराणात या विषयी विस्ताराने विवेचन केलेले आहे. त्यांत कोणती 'शांत' कोणत्या प्रसंगासाठी याचा जो ऊहापोह केला आहे त्यातील मथितार्थ असा—

शांति	**कशाच्या निवारणार्थ ?**
अभया	संकट-भय
आग्नेयी	अग्नि-भय
कौबेरी	धन-नाश-भय
कौमारी	बालक-अस्वास्थ्य-भय
त्वाष्ट्री	भाजीपाला इ. वरील रोगभय
नैर्ऋती	भूतपिशाच्च-बाधाभय
प्राजापत्या	गर्भपात-भय
पार्थिवी	वृक्ष, भूमी इ. स्थावरनाशभय
ब्राह्मी	अधर्मभय
भार्गवी	शापभय
याम्या	दुःस्वप्नभय
रौद्री	गुरांच्या साथीचे भय
वायवी	वायूमुळे होणारे क्लेश
वारुणी	दुष्काळ-अवर्षण-भय
वैष्णवी	दुष्काळ-चोर-भय
सौम्या	व्याधी-भय

प्रस्तुत ग्रंथात वयोमर्यादेच्या शान्तींचे विधी देण्यात आले आहेत, पण त्यांना दिलेली नावे वैष्णवी, वारुणी, रौद्री ही वर दिलेल्या यादीतील आहेत हे वाचकांच्या ध्यानात येईल. उलट उग्ररथ, भीमरथ, ऐन्द्री, त्र्यंबक, सहस्रचन्द्रदर्शन, कालस्वरूपसौरी, मृत्युंजय ही नावे निराळी आहेत.

कोणतेही वय प्राप्त झाल्यावर शान्त कशासाठी असा प्रश्न कोणीही करील. आपले वय झाले ही मनात चुकचुकणारी पाल बऱ्याच उतार वयाच्या लोकांना अस्वस्थ करीत असते. अमुक असे कारण नसते. अस्थानी भीती हेच निमित्त. ती उत्पन्न होते जगात घडत असणारे अपघात-उत्पात अनुभवून. आपल्याच वयाचा कोणी अकस्मात् किंवा सकारण गेल्याचे ऐकले की, पुष्कळांचे मन कांपते. अशा वेळी अकस्मात काही होऊ नये म्हणजेच दैवी आपत्ती येऊ नये किंवा निमित्त घडून होऊ नये म्हणजेच व्याधी, रोग इत्यादि होऊ नये म्हणून आवश्यक असलेल्या गोष्टींत मन निर्भय, निःशंक असणे ही गोष्ट महत्त्वाची आहे हे आजचे मानसशास्त्रज्ञही मान्य करतात. त्याकरिता मनात श्रद्धा असणे अवश्य असते. पद्मपुराणातही—

> यत् किंचिद् वस्तु संप्राप्य स्वल्पं वा यदि वा बहु ।
> या तुष्टिर्जायते चित्ते सा शान्तिः कथ्यते बुधैः ॥

हीच शान्तीची व्याख्या दिलेली आहे.

ही जी मानसिक तुष्टी अथवा शान्ती मिळावयाची ती श्रद्धामूल आहे–असते. 'श्रद्धामयोऽयं पुरुषः' 'श्रद्धावान् लभते ज्ञानं' 'अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते' इत्यादि भगवद्गीतेतील वचने हेच सांगतात. विशेषतः शेवटच्या अवतरणात श्रद्धा नसेल तर केलेले व्यर्थ आहे असे स्पष्ट सांगितले आहे; कारण शान्ती श्रद्धेने मिळायची असते, निव्वळ कृत्यांनी नव्हे. म्हणजेच मनःशान्तीची धडपड ही श्रद्धेने सफल करणे हाच खरा शान्ति-कृत्यांचा उद्देश आहे. श्रद्धा म्हणजे अंधविश्वास नव्हे हेही स्पष्ट आहे.

दर पाच वर्षांनी एक एक शान्ती या ग्रंथात सांगितली आहे. पाच वर्षांनी का? असा प्रश्न यावर विचारता येईल. अर्थात् अश्रद्ध मनाने कोणतेही प्रश्न उद्‌भावित करता येतात ते निराळे; पण पाच वर्षे हा एक पुरेसा आयुःकालखण्ड आहे– विशेषतः उतारवयात–की, ज्यात मन पुन्हा पुन्हा खचत जाण्याचे प्रसंग घडतातच. तेव्हा मनाचे कर्तृत्व पुनरुज्जीवित करण्याकरिता जो कालखण्ड घेतला

तो शतायु मानलेल्या पुरुषाच्या एका पिढीने (२० वर्षे) भागून येणारा कालखण्ड आहे. दशमान पद्धती आपल्या पूर्वजांनी फार प्राचीन काळी शोधली, योजली व प्रसारित केली. तेव्हा त्यातही पाच हाच कालखण्ड योग्य तऱ्हेने बसतो. नाहीतर आपल्या धार्मिक परंपरेत तीन आणि सात हे टप्पेही महत्त्वाचे मानले आहेत.

देवता आणि विधी हे सामान्यपणे ज्या वयाला जी देवता ऋग्वेद कालापासून मानलेली आहे त्यावरून घेतली आहे व विधी देवताभेदाने मन्त्रभेद करून सर्वसामान्य आहेत. विधी समन्त्रक असावेत याकरिता ऋग्वेदीय ऋचांचे पठण आहे पण एक ऋचा (७) अऋग्वेदीय लौकिकही आहे. सर्वत्र यज्ञाचे स्वरूप आहे. 'यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः' 'यज्ञायाचरतः कर्म समग्रं प्रविलीयते' ही गीतेची वचने यज्ञ शब्दाच्या समुचित अर्थग्रहणाने हेच दाखवतात. सर्व कर्मे यज्ञ म्हणून यज्ञार्थ करावीत.

पं. श्री. नारायणशास्त्री यांनी ही सर्व कर्मे प्राकृतजनांकरिता साधार सांगोपांग लिहिली याबद्दल श्रद्धावान् त्यांचे ऋणी राहातील. अशी ही शान्तिकृत्ये एकत्र मिळत नव्हती. ती जनतेला उपलब्ध करून देऊन प्रकाशकांनी जनतेवर उपकारच केले आहेत. विशेषतः वैदिकांना आता विधी कोठे शोधावा ही विवंचना राहाणार नाही.

मला मुद्रितांवर दृष्टी टाकण्याच्या निमित्ताने हा ग्रंथ पाहाण्याचे सद्‌भाग्य मिळाले. माझ्याप्रमाणेच इतरांचेही त्यामुळे श्रेयस् होवो हीच प्रार्थना—

> आचार्यै रचितेन शान्तिविधिना ग्रन्थोऽयमास्ते भृतो
> लोकेऽस्मिन् प्रथितः प्रकाशकवरैः कल्याणकृज्जीविनाम् ।
> संसारे विविधाः समागतवयोऽवस्थाभिधाः शान्तयः
> कर्तव्या मनुजैर्यथाबलमहो श्रद्धायुतैर्मानसैः ॥

इत्यलम् ।

मुंबई ४
विजयादशमी १९८३

श्री॰ भि॰ वेलणकर

सर्व शांतींचा सर्वसामान्य विधी

वय वर्षे ५० ते १०० या वर्षांत एकूण ११ शांती कराव्यात असे या ग्रंथात दिलेले आहे. सर्वसामान्यपणे सर्व शांती सारख्याच प्रकाराच्या असतात. प्रामुख्याने संकल्प करताना वयाचा उल्लेख बदलतो. तसेच शांतीची देवता, मंत्र, हवनीय द्रव्ये, हवनसंख्या, उपदेवता, नक्षत्रदेवता इत्यादि बदलतात.

यजमानाने स्वतः (पत्नीसह) बसून संकल्प सोडावयाचा असतो. गणपती पूजन आणि पुण्याहवाचनादि झाल्यावर शांतिकर्म चालविण्यासाठी आपल्या गुरुजींना सुपारी म्हणजे अधिकार द्यावयाचा असतो. यालाच याज्ञिकामध्ये 'वर्ण' देणे असे म्हणतात. हा देऊन झाल्यावर पुढील बरेचसे कार्य गुरुजी आणि त्यांचे ४/५ साहाय्यक गुरुजी हे करतात.

प्रथम पंचगव्य, मोहरी इत्यादिकांनी शांतीच्या जागेची शुद्धी व पुरुषसूक्त इत्यादिकांनी आपल्या, म्हणजे स्वतः गुरुजींच्या, देहाची शुद्धी करतात. नंतर देवतास्थापना, अग्निस्थापना, (ज्या शांतीमध्ये ज्याप्रमाणे सांगितले असेल त्याप्रमाणे तसे) करतात. देवतापूजन इत्यादि करून मग हवनाला प्रारंभ करतात. हवन झाल्यावर यजमानाला काही वैदिक मंत्र, सूक्ते आयुष्य-वर्धनार्थ व आरोग्यासाठी ऐकवितात. ही सूक्ते वेगवेगळ्या शांतीच्या वेळी वेगवेगळी नाहीत. यानंतर काही हविर्द्रव्यातून जो थोडा थोडा शिल्लक ठेवलेला भाग असतो तो सर्व एकत्रित करून गुरुजी त्याची एक आहुती देतात. यालाच स्विष्टकृत असे म्हणतात. कोणत्या हविर्द्रव्यातून शिल्लक भाग ठेवायचा व कोणत्यात ठेवायचा नाही हे पूर्वाचार्यांनी ठरवून दिलेले आहे. यानंतर प्रायश्चित्तहोम करण्यात येतो. तो झाल्यावर यजमानाला बसवून व अन्य देवता-प्रीत्यर्थ क्षेत्रपालबळी देऊन व त्याची पूजा करवून कुटुंबातील मंडळींच्या अंगावरून ओवाळून काढला जातो. मग शांतिसूक्त म्हणतात. ते झाल्यावर यजमानाच्या हातून पूर्णाहुती दिली जाते. ती देऊन झाल्यावर होमाचे राहिलेले उत्तरांग, स्थापितदेवतांची उत्तरपूजा इत्यादि झाल्यावर गुरुजी त्या देवतांच्या कलशोदकांनी व इतर अभिमंत्रित केलेल्या जलांनी यजमान व सर्व कुटुंबीय यांच्यावर अभिषिंचन करतात. अभिषेक संपल्यानंतर यजमानाने नूतनवस्त्र धारण करून (दुसरे वस्त्र नेसून) होमाजवळ बसावे.

अग्निदेवता इत्यादींची प्रार्थना करून होमविभूती धारण करावी. आयुष्याच्या वाढीसाठी आणि आरोग्य मिळावे म्हणून दूध प्यावे. आज्य-कांस्यपात्रात (काशाच्या वाटीत पातळ तूप घेऊन) स्वतःचे मुखावलोकन करावे. नंतर गुरुजींना पीठदान दशदान इत्यादी दाने द्यावीत. नंतर यजमानाच्या मुलांनी अथवा मुलींनी यजमानाना पुष्पमाला, वस्त्रे, भेटी इत्यादि देऊन त्यांचा सन्मान करावा व ५, ७ अथवा १० सुवासिनींनी जितकी वर्षे वय तितके दीप घेऊन ओवाळावे. यजमानाला सर्वांनी दीर्घायुष्य आणि अखंड आरोग्य चिंतून शांतीची समाप्ती करावी. ब्राह्मणभोजनाचा संकल्प करून नंतर दक्षिणा द्यावी व आशीर्वाद घ्यावा. सर्व कर्म पूर्ण झाल्यावर यजमानाने श्रीविष्णूचे तीन वेळा स्मरण करावे. (प्रार्थना करावी.)

सर्व शांतींची सर्वसामान्य यादी

हळद, पिंजर, गुलाल, रांगोळी प्रत्येकी द्रोणभर. पंचामृतपूजासाहित्य. पंचगव्य साहित्य-गोमूत्र, गोमय वगैरे. पंचपल्लव-आंबा, वड, पिंपळ, उंबर, पायरी प्रत्येकी थोडे. १० पाट, २ चौरंग, ३ कलश, ३ ताम्हने, समई, दिवा, १५ नारळ, तांदूळ, १०० सुपारी, ५० विड्याची पाने. वस्त्रे-१ धोतर, २ पंचे, २ खण, २ रुमाल व अभिषेक वस्त्रे, होमाकरता वाळू किंवा शुद्ध माती. शेणी, साल्पा, फुंकणी, तूप, जानवी जोड, चरु (शिजलेला भात) २ किलोचा, तीळ, भाताच्या लाह्या, पिकलेली केळी वगैरे फळे. समिधा-रुई, पळस, खैर, आघाडा, पिंपळ, शमी प्रत्येकी २०, दूर्वा (भरपूर), उंबर १५०. हवन संख्येनुसार कमीजास्त. सुवर्णप्रतिमा. बळीकरिता-२ परड्या किंवा विऱ्या, बळी नेण्याकरता गडी; मोहोऱ्या, उडदाची डाळ, प्रत्येकी थोड्या, कांशाची वाटी. अहेराचे सामान. दशदाने-गो, भू, तिल, हिरण्य, वस्त्र, धान्य, गुड, मीठ, लोह, ऊर्णावस्त्र यांच्याबद्दल निष्क्रयद्रव्य, सुवर्णदान दशगुंजा, गोप्रदान, खर्चाकरिता द्रव्य. अग्निसिद्धी प्रायश्चित्त-ब्राह्मण कमीतकमी ६, आचार्य दक्षिणा, मंगल वाद्य, तोरण. ज्या वयाची शांती असेल तितके पिठाचे दिवे.

ही सर्वसामान्य यादी आहे. हवनसंख्येनुसार समिधा-तूप, चरु यांचे प्रमाण कल्पनेनुसार ठरवावे. साठीशांतीसाठी तीळ, दुर्वाहवन विशेष आहे. भीमरथीमध्ये केवळ तीळच आहेत. सहस्रचंद्रदर्शनमध्ये केवळ आज्य.

नक्षत्र, नक्षत्रदेवता व त्यांचे नाममंत्र

अग्निः प्रजापतिः सोमो रुद्रोऽदितिर्बृहस्पतिः ।
सर्पाश्च पितरश्चैव भगश्चैवार्यमापि च ।
सविता त्वष्टाऽथ वायुश्चेन्द्राग्नी मित्र एव च ।
इन्द्रो निर्ऋतिरापो वै विश्वेदेवास्तथैव च ।
विष्णुर्वसवो वरुणोऽज एकपात् तथैव च ।
अहिर्बुध्न्यास्तथा पूषाऽश्विनौ यम एव च ।
नक्षत्रदेवता एता एताभिर्यज्ञकर्मणि । इति वेदांगज्योतिषे ।

अर्थ—वेदांगज्योतिषामध्ये कृत्तिकानक्षत्रापासून नक्षत्रदेवता क्रमाने सांगितल्या आहेत. देवता २७ आहेत. संस्कारकौस्तुभ, शांतिकमलाकर इत्यादि शांतिग्रंथांतून नक्षत्रांचे वैदिकमंत्र न घेता केवळ नक्षत्रदेवतांचे नाममंत्र घेतले आहेत. अर्थात् सुलभपणाकरता या शांतिप्रकरणी आम्ही तीच पद्धती स्वीकारली आहे.

"अत्र शांतिकर्मणि जन्मनक्षत्रदेवतां जन्मनक्षत्रं वा नाममंत्रेण स्थापयेत्पूजयेच्च" इति शांतिकमलाकरे ।

अश्विन्यादिक्रमेण

नक्षत्र	तद्देवतानाममंत्र	नक्षत्रनाममंत्र
अश्विनी	ॐ अश्विभ्यां नमः अश्विनौ आवाह०	ॐ अश्वयुग्भ्यां नमः अश्वयुजौ आवाहयामि
भरणी	ॐ यमाय नमः यमं आवाह०	ॐ अपभरणीभ्यो नमः अपभरणीः आवाह०
कृत्तिका	ॐ अग्नये नमः अग्निं आवाह०	ॐ कृत्तिकाभ्यो नमः कृत्तिकाः आवाह०
रोहिणी	ॐ प्रजापतये नमः प्रजापतिं आवाह०	ॐ रोहिण्यै नमः रोहिणीं आवाह०
मृग	ॐ सोमाय नमः सोमं आवाह०	ॐ मृगशीर्षाय नमः मृगशीर्षं आवाह०
आर्द्रा	ॐ रुद्राय नमः रुद्रं आवाह०	ॐ आर्द्रायै नमः आर्द्रां आवाह०
पुनर्वसु	ॐ अदितये नमः अदितिं आवाह०	ॐ पुनर्वसुभ्यां नमः पुनर्वसू आवाह०
पुष्य	ॐ बृहस्पतये नमः बृहस्पतिं आवाह०	ॐ पुष्याय नमः पुष्यं आवाह०
आश्लेषा	ॐ सर्पेभ्यो नमः सर्पान् आवाह०	ॐ आश्लेषायै नमः आश्लेषां आवाह०
मघा	ॐ पितृभ्यो नमः पितॄन् आवाह०	ॐ मघायै नमः मघां आवाह०
पूर्वा फाल्गुनी	ॐ भगाय नमः भगं आवाह०	ॐ पूर्व-फल्गुनीभ्यां नमः पूर्व-फल्गुन्यौ आवाह०
उत्तरा फाल्गुनी	ॐ अर्यम्णे नमः अर्यमणं आवाह०	ॐ उत्तर-फल्गुनीभ्यां नमः उत्तर-फल्गुन्यौ आवाह०
हस्त	ॐ सवित्रे नमः सवितारं आवाह०	ॐ हस्ताय नमः हस्तं आवाह०
चित्रा	ॐ त्वष्ट्रे नमः त्वष्टारं आवाह०	ॐ चित्रायै नमः चित्रां आवाह०

नक्षत्र	तद्देवतानाममंत्र	नक्षत्रनाममंत्र
स्वाती	ॐ वायवे नमः वायुं आवाह०	ॐ स्वात्यै नमः स्वातीं आवाह०
विशाखा	ॐ इंद्राग्निभ्यां नमः इंद्राग्नी आवाह०	ॐ विशाखाभ्यां नमः विशाखे आवाह०
अनुराधा	ॐ मित्राय नमः मित्रं आवाह०	ॐ अनुराधाभ्यो नमः अनुराधाः आवाह०
ज्येष्ठा	ॐ इंद्राय नमः इंद्रं आवाह०	ॐ ज्येष्ठायै नमः ज्येष्ठां आवाह०
मूळ	ॐ निर्ऋतये नमः निर्ऋतिं आवाह०	ॐ मूलाय नमः मूलं आवाह०
पूर्वाषाढा	ॐ अद्भ्यो नमः अपः आवाह०	ॐ पूर्वाषाढाभ्यां नमः पूर्वाषाढे आवाह०
उत्तराषाढा	ॐ विश्वेभ्यो देवेभ्यो नमः विश्वान् देवान् आवाह०	ॐ उत्तराषाढाभ्यां नमः उत्तराषाढे आवाह०
श्रवण	ॐ विष्णवे नमः विष्णुं आवाह०	ॐ श्रवणाय नमः श्रवणं आवाह०
धनिष्ठा	ॐ वसुभ्यो नमः वसून् आवाह०	ॐ धनिष्ठायै नमः धनिष्ठां आवाह०
शततारका	ॐ वरुणाय नमः वरुणं आवाह०	ॐ शतभिषजे नमः शतभिषजं आवाह०
पूर्वाभाद्रपदा	ॐ अजैकपदे नमः अजैकपदं आवाह०	ॐ पूर्वप्रोष्ठपद्भ्यां नमः पूर्वप्रोष्ठपदे आवाह०
उत्तराभाद्रपदा	ॐ अहिर्बुध्न्याय नमः अहिर्बुध्न्यं आवाह०	ॐ उत्तरप्रोष्ठपद्भ्यां नमः उत्तरप्रोष्ठपदे आवाह०
रेवती	ॐ पूष्णे नमः पूषाणं आवाह०	ॐ रेवत्यै नमः रेवतीं आवाह०

इति नक्षत्रदेवतानां नाममंत्राः नक्षत्रनाममंत्राश्च ।

ज्या शांतीमध्ये नक्षत्रदेवता वा जन्मनक्षत्र यांचे आवाहन, हवन सांगितले असेल त्यावेळी याचा उपयोग होईल.

अथ वैष्णवी–शान्तेः प्रयोगदर्शनम् ।

* * * * * * * * * * * * * * * * *

प्रधानदेवता :	: विष्णुः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: वषट् ते विष्णवास ।
हवनीयद्रव्याणि :	: समिधू-चरु-आज्य-पायसानि ।
हवनसंख्या :	: १००८ वा १०८ वा यथाशक्ति ।
उपदेवता :	: मृत्युंजयत्र्यंबकः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: त्र्यंबकं यजामहे ।
हवनीयद्रव्यं :	: घृताक्ततिलाः ।
हवनसंख्या :	: १००८ वा १०८ वा यथाशक्ति ।
नक्षत्रदेवता :	: यजमानस्य यद् जन्मनक्षत्रं तद् देवता।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: नाममंत्रः ।
हवनीयद्रव्यं :	: आज्यम् ।
आहुतिसंख्या :	: २८ वा ८ वा यथाशक्ति ।

सर्वशान्तीनां संकल्पस्वरूपं एकमेव । केवलं वयःसंख्याभेदः । सर्वासु शान्तिषु हवनसमाप्तौ स्विष्टकृतात् पूर्वं विविधसूक्तानि यजमानाय श्रावयेत् । अनन्तरम् स्विष्ट-कृतादि–प्रायश्चित्तहोमान्ते बलिदानम् पूर्णाहुतिं संस्रावादिहोमशेषं समाप्य कलशोदकैः यजमानं अभिषिंचेत । नूतनवस्त्रान्ते विभूतिं धृत्वा देवतां सप्तचिरंजीवांश्च प्रार्थयेत। देवतोत्तरपूजनम्, दुग्धप्राशनम्, आज्यावलोकनम्, पीठदानम्, दशदानम्, शतगुंजासुवर्णदानम्, ब्राह्मणभोजनदक्षिणादानम् इत्यादीनां संकल्पः । यजमानं सत्कृत्य (अहेर) नीराजनविधिः, आशीर्वादः । त्रिवारं विष्णुस्मरणेन कर्मसमाप्ति वाचयेत् इति । अयम् उत्तरांगविधिः सर्वत्र समानः ।

(**सूचना :** आसु सर्वासु शांतिषु ब्रह्मादिमंडलदेवतास्थापनपक्षो वैकल्पिकः । इति ।)

अथ वैष्णवी शान्तिः ।

[पंचाशत्वर्षे (५०) क्रियमाणा ।]

अथ कर्ता यजमानः जन्मनः सकाशात् **पंचाशत्वर्षे प्राप्ते**, जन्मदिने, जन्मनक्षत्रे, चन्द्रानुकूल्ये शुभेऽहनि वा, कृताभ्यंगः कृतनित्यक्रियः, कृताग्निसिद्धिः शुभे सवस्त्रपीठासने उपविश्य, यज्ञोपवीती, आचम्य, पवित्रपाणिः प्राणानायम्य, पंचगव्यप्राशनादिना शरीरशुद्धिं विधाय, सुवासिन्या कृतमंगलतिलकः देवतागुर्वादींश्चाभिवाद्य, ब्राह्मणैर्दत्तानुज्ञः स्वासने उपविश्य, पुनः आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रः अमुकशर्माऽहं मम जन्मनः सकाशात् **पंचाशत्तमे** वर्षे प्राप्ते सूचित–संभाव्यमान–नानाविधरोग–दृष्टिमान्द्य— छायावैकृत्य–भार्यापुत्रादिवियोग – धनधान्यपशुक्षयादि–अरिष्ट–निरसनार्थं जन्मराशिजन्मलग्नाभ्यां सकाशात् गोचरेण अनिष्टस्थानस्थित–आदित्यादि–नवग्रहाणां उत्पन्नोत्पत्स्यमान–पीडापरिहारपूर्वकं सर्वसुखावाप्तिधनधान्याद्यभिवृद्ध्यर्थं समस्तमंगलप्राप्त्यर्थं देशकालाद्यनुसारतः विद्वदुपदिष्टेन विधिना यथा संभृतसंभारैः यथाशक्ति यथाज्ञानतः सग्रहमखां **शौनकोक्तां वैष्णवीशान्तिं करिष्ये** । तदंगं स्वस्ति–पुण्याहवाचनं मातृकापूजननांदीश्राद्धं आचार्यवरणं च करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं करिष्ये । इति संकल्प्य, तानि कृत्वा वृताचार्यः स्थंडिलसमीपमुपविश्य, आचम्येत्यादि० श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रोत्पन्नेन अमुकशर्मणा यजमानेन संकल्पित–**वैष्णवीशान्ति**कर्मणि वृतोऽहं यथाज्ञानतः देशकालाद्यनुसारेण एभिर्ब्राह्मणैः सह आचार्यकर्म करिष्ये । तदंगं शरीरशुद्ध्यर्थं पुरुषसूक्त–जप–पूर्वकम् भू–शुद्ध्यादि करिष्ये, आदौ निर्विघ्नार्थं महागणपति–स्मरणं च करिष्ये । इत्यादि गौरसर्षपविकिरणादि प्रादेशान्तं कर्म कृत्वा, स्थण्डिलात् पूर्वभागे वेदीं प्रकल्प्य, (अत्र केचन–सर्वतोभद्रस्य (लिंगतोभद्रस्य वा) सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य, तत्र ब्रह्मादि–मंडल देवताः आवाह्य, संपूज्य, तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां देवतास्थापनमिच्छन्ति ।) सवस्त्रपीठासने तण्डुलराश्युपरि महीद्यौरित्यादिना कलशं प्रतिष्ठाप्य, वरुणप्रार्थनान्तं कृत्वा, पूर्णपात्रे अष्टदलमध्ये कर्णिकायां कृताग्न्युत्तारणपूर्विकायां सुवर्णप्रतिमायां **वषट् ते विष्णवास इति मंत्रेण प्रधानदेवं विष्णुमावाहयेत् । तद्यथा–वषट् ते विष्णवास इति मंत्रस्य मैत्रावरुणिर्वसिष्ठो विष्णुस्त्रिष्टुब् विष्णु–आवाहने विनियोगः ।**

ॐ वषट् ते विष्णवासऽआकृणोमि
तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे
यूयं पात स्वस्तिभिः सदा नः ।
(अष्टक–५, अ–६, वर्ग–२४)

अस्यां सुवर्णमय्यां मूर्तौ प्रधानदेवतां विष्णुं सांगं सपरिवारं सायुधं सशक्तिकं आवाहयामि । ॐ भूः **विष्णुं आवा०** । **ॐ** भुवः विष्णुं० आवा० । ॐ स्वः विष्णुं आवा०, ॐ भूर्भुवः स्वः विष्णुं आवा० । तदुत्तरतः त्र्यंबकेति मंत्रेण **त्र्यंबकं** आवाह्य । तदुत्तरतः **नक्षत्रदेवतां** नाममंत्रेणावाह्य, काण्डानुसमयेन पदार्थानुसमयेन वा सर्वान् संपूज्य, प्रधानदेवतासमीपे तन्मंत्रं (वषट् ते०) **अष्टोत्तरशतं** अष्टाविंशतिवारं वा जप्त्वा, स्थंडिलान्तिकमेत्य, अद्येत्यादि० संकल्पित–**वैष्णवी**–शांतिकर्मणि स्थंडिलादि–सकलं कर्म करिष्ये । वरदनामानमग्निं प्रतिष्ठाप्य, ध्यात्वा, ध्यानान्ते देवतोत्तरवेद्यां आदित्यादिनवग्रहानावाह्य, संपूज्य, देवदानवसंवादे० इति वरुणप्रार्थनान्तं कृत्वा, स्थंडिलसमीपमेत्य समिद्द्वयेत्यन्वादध्यात् । चक्षुष्यन्तं उक्त्वा ग्रहानन्वादध्यात् । **अत्र प्रधानं देवं विष्णुं, वषट् ते विष्णवासेति मंत्रेण समिध्-आज्य-चरु-पायसद्रव्यैः चतुर्भिः प्रतिद्रव्यं (अष्टोत्तरसहस्र)–अष्टोत्तरशतसंख्याकाभिराहुतिभिर्वा, मृत्युंजयं त्र्यंबकं त्र्यंबकेतिमंत्रेण घृताक्ततिलद्रव्येण सहस्रसंख्याकाहुतिभिः नक्षत्रदेवतां नाममंत्रेण अष्टाविंशति–अग्रसंख्याकाभिराज्यद्रव्येण यक्ष्ये** । शेषेण स्विष्टकृतमिति चक्षुष्यन्तं कर्म कृत्वा यजमानेन द्रव्यत्यागे कृते, ग्रहहोमं प्रधानादिहोमं विधाय **स्विष्टकृतात्** प्राक् **विविधसूक्तपाठजपः कार्यः** । तानि च सूक्तानि–श्रीसूक्तं, रुद्राध्यायं, आयुष्य-मंत्रान् जपेत् । ते च ऋक्-द्वयं एष वां देवा परावतो सप्तदशर्चं आ नो भद्रा दशर्चं इति वा इति आयुष्यमिति च सूक्तं पठेत् । ततः वेदपारायणं कार्यं तदसंभवे पुरुषसूक्तं अग्निमीळे इति नवर्चं सूक्तं च पठेत् । ततः स्विष्टकृतादिप्रायश्चित्तहोमान्ते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावादिहोमशेषं समाप्य, स्थापितकलशोदकैः सकुटुंबं बंधुवर्गयुतं यजमानं अभिषिंचेत् । तत्र अभिषेकमंत्राः– समुद्रज्येष्ठा० शं न इंद्राग्नी० परं मृत्यो० एष वां देवा ऋग्द्वयं० परावतो सप्तदशर्चं,

स्त्वादिष्टयेति दशर्च, अक्षिभ्यां षट्भिः, यज्जाग्रत इति षण्णाम् । ग्रहमंत्र-मुख्य-देवतामंत्रेत्यादीनां सर्वेषां अभिषेके विनियोगः ।

(अभिषेकमंत्राणां बाहुल्यात् यथावकाशं यथाशक्ति पाठः ।)

ततो यजमानः अभिषेकवस्त्रं परित्यज्य, धृतशुक्लांबरः, अभिषेकवस्त्रं आचार्याय दद्यात् । विभूतिं धृत्वा आ नो भद्रा इति महाशांतिजपपूर्वकं देवतोत्तरपूजने कृते, मार्कंडेयादीन् प्रार्थयेत । ततः आयुर्वृद्ध्यै सतिलगुडसंमिश्रं दुग्धं प्राशयेत् । तत्र मंत्रः **'सतिलं गुडसंमिश्रं अंजल्यर्धमितं पयः । मार्कंडेयात् वरं लब्ध्वा पिबाम्यायुर्विवृद्धये ।** इति पिबेत् । ततः कांस्यपात्रे घृतमासिच्य, तत्र **'रूपं रूपं'** इति मंत्रेण आज्यावलोकनं कृत्वा तत्पात्रं, सदक्षिणाकं ब्राह्मणाय दत्त्वा, गो-भू-तिल-हिरण्यादि-दशदानानि कानिचित् प्रत्यक्षाणि, कानिचित् निष्क्रयद्वारा, सर्वाणि वा निष्क्रयरूपेण ब्राह्मणेभ्यः दत्त्वा, तथा शतगुंजापरिमितं सुवर्णं, तन्निष्क्रयं वा विभज्य विभज्य ब्राह्मणेभ्यो दत्त्वा; अशक्तौ शतसर्षपतुलितं वा ततः विसर्जितदेवतापीठदानान्ते तिलदानं च कृत्वा, तत्र मंत्रः 'तिलाः कश्यपसंभूतास्तिलाः पापहराः शुभाः । तिलपात्रप्रदानेन अतः शान्तिं प्रयच्छ मे ॥' इति । पुत्रादिकैः पुष्पमालावस्त्रादिना यजमानं (अहेर) सत्कृत्य पुरंध्रीभिः (सुवासिनीभिः) आचारात् यजमानस्य यावन्ति वयोवर्षाणि तावद्भिर्वा नीराजनैः (दीपैः) नीराजयित्वा, ब्राह्मणेभ्यः दक्षिणां दत्त्वा, तेभ्यःआशीर्वचनं गृहीत्वा, ब्राह्मणभोजनसंकल्पं कृत्वा, देवानभिवाद्य, कर्म परमेश्वरार्पणं कुर्यात् । द्विराचम्य, त्रिवारं विष्णुस्मरणं कुर्यात् इति ।

॥ इति प्राचीनग्रंथानुसारं नारायणशास्त्री जोशी-विरचिता वैष्णवी-शांतिः समाप्ता ॥

॥ श्रीकृष्णार्पणमस्तु ॥

अथ वारुणी–शान्तेः प्रयोगदर्शनम् ।

* * * * * * * * * * * * * * * * * *

प्रधानदेवता :	: वरुणः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: ध्रुवासु त्वासु ।
हवनीय द्रव्याणि :	: समिद्-आज्य-चरु-पायसानि ।
हवनसंख्याप्रतिद्रव्यं :	: १००८ वा १०८ वा यथाशक्ति ।
उपदेवता :	: त्र्यंबकः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: त्र्यंबकं यजामहे ।
हवनीयद्रव्यं :	: घृताक्ततिलाः ।
हवनसंख्या :	: १००८ वा १०८ वा यथाशक्ति ।
नक्षत्रदेवता :	: यजमानस्य जन्मनक्षत्र तद् देवता ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: नाममंत्रः ।
हवनीयद्रव्यं :	: केवलं आज्यम् ।
हवनसंख्या :	: २८ वा ८ वा यथाशक्ति ।

सर्वशान्तीनां संकल्पस्वरूपं एकमेव । केवलं वयःसंख्याभेदः । सर्वासु शान्तिषु हवनसमाप्तौ स्विष्टकृतात् पूर्वं विविधसूक्तानि यजमानाय श्रावयेत् । अनन्तरम् स्विष्टकृतादि–प्रायश्चित्तहोमान्ते बलिदानम् पूर्णाहुतिं संस्रावादिहोमशेषं समाप्य कलशोदकैः यजमानं अभिषिंचेत् । नूतनवस्त्रान्ते विभूतिं धृत्वा देवतां सप्तचिरंजीवांश्च प्रार्थयेत । देवतोत्तरपूजनम्, दुग्धप्राशनम्, आज्यावलोकनम्, पीठदानम्, दशदानम्, शतगुंजासुवर्णदानम्, ब्राह्मणभोजनदक्षिणादानम् इत्यादीनां संकल्पः । यजमानं सत्कृत्य (अहेर) नीराजनविधिः, आशीर्वादः । त्रिवारं विष्णुस्मरणेन कर्मसमाप्तिं वाचयेत् इति । अयम् उत्तरांगविधिः सर्वत्र समानः ।

अथ वारुणी शान्तिः ।

[पञ्चाधिकपञ्चाशत्वर्षे (५५) क्रियमाणा ।]

अथ कर्ता यजमानः जन्मनः सकाशात् **पञ्चाधिकपञ्चाशत्वष प्राप्ते**, जन्मदिने, जन्मनक्षत्रे, चंद्रानुकूल्ये शुभेऽहनि वा कृताभ्यंगः, कृतनित्यक्रियः, कृताग्निसिद्धिः शुभे सवस्त्रपीठासने उपविश्य, यज्ञोपवीती, आचम्य, पवित्रपाणिः प्राणानायम्य पंचगव्य-प्राशनादिना शरीरशुद्धिं विधाय, सुवासिन्या कृतमंगलतिलकः देवतागुर्वा-दींश्चाभिवाद्य, ब्राह्मणैर्दत्तानुज्ञः स्वासने उपविश्य, पुनः आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रः अमुकशर्माऽहं मम जन्मनः सकाशात् **पञ्चाधिकपञ्चाशत्तमे** वर्षे प्राप्ते सूचित–संभाव्यमान–नानाविधरोग–दृष्टिमान्द्य–छायावैकृत्य–भार्यापुत्रादिवियोग–धनधान्यपशुक्षयादि–अरिष्ट–निरसनार्थं जन्मराशिजन्मलग्नाभ्यां सकाशात् गोचरेण **अनिष्टस्थानस्थित**–आदित्यादि–नवग्रहाणां उत्पन्नोत्पत्स्यमान-पीडापरिहारपूर्वकं सर्वसुखावाप्तिधनधान्याद्यभिवृद्ध्यर्थं समस्तमंगलप्राप्त्यर्थं देशकालाद्यनुसारतः विद्वदुपदिष्टेन विधिना यथा–संभृत-संभारैः यथाशक्ति यथाज्ञानतः सग्रहमखां **शौनकोक्तां वारुणीं शांतिं करिष्ये** । तदंगं स्वस्ति–पुण्याहवाचनं मातृकापूजननांदीश्राद्धं आचार्यवरणं च करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं च करिष्ये । इति संकल्प्य, तानि कृत्वा, वृताचार्यः स्थंडिलसमीपमुपविश्य, आचम्येत्यादि० श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रोत्पन्नेन अमुकशर्मणा यजमानेन संकल्पित–**वारुणीशांति**–कर्मणि वृतोऽहं यथाज्ञानतः देशकालाद्यनुसारेण एभिर्ब्राह्मणैः सह आचार्यकर्म करिष्ये । तदंगं शरीरशुद्ध्यर्थं पुरुषसूक्त–जप–पूर्वकम् भू–शुद्ध्यादि करिष्ये, आदौ निर्विघ्नार्थं महागणपति–स्मरणं च करिष्ये । इत्यादि गौरसर्षपविकिरणादि प्रादेशान्तं कर्म कृत्वा, स्थण्डिलात् पूर्वभागे वेदीं प्रकल्प्य, (अत्र केचन-सर्वतोभद्रस्य (लिंगतोभद्रस्य वा) सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य, तत्र ब्रह्मादि-मंडल-देवताः आवाह्य, संपूज्य, तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां देवतास्थापनमिच्छन्ति ।) सवस्त्रपीठासने तण्डुलराश्युपरि महीद्यौरित्यादिना कलशं प्रतिष्ठाप्य, वरुणप्रार्थनान्तं कृत्वा, पूर्णपात्रे अष्टदलमध्ये कर्णिकायां कृताग्न्युत्तारणपूर्विकायां सुवर्णप्रतिमायां–**ध्रुवासु त्वा इति मंत्रेण प्रधानदेवं वरुणमावाहयेत् । तद्यथा-ध्रुवासु त्वा इति मंत्रस्य मैत्रावरुणिर्वसिष्ठो वरुणो जगती, पाशमोचन वरुणावाहने विनियोगः ।**

ॐ ध्रुवासु त्वासुक्षितिषु क्षियन्तो
व्यऽ१स्मत्पाशं वरुणो मुमोचत् ।
अवो वन्वाना अदितेरुपस्थात् ।
यूयं पात स्वस्तिभिः सदा नः ॥

(अष्टक–५, अ–६, वर्ग–१०)

अस्यां सुवर्णमय्यां मूर्तौ प्रधानदेवतां पाशमोचनं वरुणं सांगं सपरिवारं सायुधं सशक्तिकं आवाहयामि । ॐ भूः पाशमोचनं वरुणं आवा० । ॐ भुवः पाशमोचनं वरुणं आवा० । ॐ स्वः पाशमोचनं वरुणं आवा० । ॐ भूर्भुवःस्वः पाशमोचनं वरुणं आवा० । तदुत्तरतः त्र्यंबकेति मंत्रेण **त्र्यंबकं** आवाह्य, तदुत्तरतः **नक्षत्रदेवतां** नाममंत्रेणावाह्य, काण्डानुसमयेन पदार्थानुसमयेन वा सर्वान् संपूज्य, प्रधानदेवता-समीपे तन्मंत्रं (ध्रुवासु त्वा०) अष्टोत्तरशतं अष्टाविंशतिवारं वा जप्त्वा, स्थंडिलान्तिकमेत्य, अद्येत्यादि० संकल्पित-वारुणी-शांतिकर्मणि स्थंडिलादिसकलं कर्म करिष्ये । वरद-नामानमग्निं प्रतिष्ठाप्य, ध्यात्वा, ध्यानान्ते देवतोत्तरवेद्यां आदित्यादिनवग्रहानावाह्य, संपूज्य, देवदानवसंवादे० इति वरुणप्रार्थनान्तं कृत्वा, स्थंडिलसमीपमेत्य समिद्द्वयेत्य-न्वादध्यात् । चक्षुष्यन्तं उक्त्वा ग्रहानन्वादध्यात् । **अत्र प्रधानदेवतां पाशमोचनं वरुणं तन्मंत्रेण समिध्-आज्य-चरु-पायस-द्रव्यैः चतुर्भिः प्रतिद्रव्यं (अष्टोत्तरसहस्र)–अष्टोत्तरशतसंख्याकाभिराहुतिभिर्वा, मृत्युंजयं त्र्यंबकं त्र्यंबकेतिमंत्रेण घृताक्ततिलद्रव्येण सहस्रसंख्याकाहुतिभिः नक्षत्रदेवतां नाम-मंत्रेण अष्टाविंशति-अष्टसंख्याकाभिराज्य-द्रव्येण यक्ष्ये** । शेषेण स्विष्टकृतमिति चक्षुष्यन्तं कर्म कृत्वा यजमानेन द्रव्यत्यागे कृते, ग्रहहोमं प्रधानादिहोमं विधाय, **स्विष्टकृतात्** प्राक् **विविधसूक्तपाठजपः कार्यः** । तानि च सूक्तानि–श्रीसूक्तं, रुद्राध्यायं, आयुष्य-मंत्रान् जपेत् । ते च ऋक्द्वयं एष वां देवा परावतो सप्तदशर्चं, आ नो भद्रा दशर्चं इति वा इति आयुष्यमिति च सूक्तं पठेत् । ततः वेदपारायणं कार्यम् । तदसंभवे पुरुषसूक्तं अग्निमीळे इति नवर्चसूक्तं च पठेत् । ततः स्विष्टकृतादि प्रायश्चित-होमान्ते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावादिहोमशेषं समाप्य, स्थापित-कलशोदकैः सकुटुंबं बंधुवर्गयुतं यजमानं अभिषिंचेत् । तत्र अभिषेकमंत्राः–

समुद्रज्येष्ठा० शं न इंद्राग्नी० परं मृत्यो० एष वां देवा ऋग्द्वयं० परावतो सप्तदशार्चं स्वादिष्टयेति दशार्चं, अक्षिभ्यां षट्भिः, यज्जाग्रत इति षण्णाम् । ग्रहमंत्र-मुख्यदेवता-मंत्रेत्यादीनां सर्वेषां अभिषेके विनियोगः ।

(अभिषेकमंत्राणां बाहुल्यात् यथावकाशं यथाशक्ति पाठः ।)

ततो यजमानः अभिषेकवस्त्रं परित्यज्य, धृतशुक्लांबरः, अभिषेकवस्त्रं आचार्याय दद्यात् । विभूतिं धृत्वा आ नो भद्रा इति महाशांतिजपपूर्वकं देवतोत्तरपूजने कृते, मार्कंडेयादीन् प्रार्थयेत । ततः आयुर्वृद्ध्यै सतिलगुडसंमिश्रं दुग्धं प्राशयेत् । तत्र मंत्रः '**सतिलं गुडसंमिश्रं अंजल्यर्धमितं पयः मार्कंडेयात् वरं लब्ध्वा पिबाम्यायुर्विवृद्धये** । इति पिबेत् । ततः कांस्यपात्रे घृतमासिच्य, तत्र '**रूपं रूपं**' इति मंत्रेण आज्यावलोकनं कृत्वा, तत्पात्रं सदक्षिणाकं ब्राह्मणाय दत्त्वा, गो-भू-तिल-हिरण्यादि दशदानानि कानिचित् प्रत्यक्षाणि कानिचित् निष्क्रयद्वारा सर्वाणि वा निष्क्रयरूपेण ब्राह्मणेभ्यः दत्त्वा तथा शतगुंजापरिमितं सुवर्णं, तन्निष्क्रयं वा विभज्य विभज्य ब्राह्मणेभ्यो दत्त्वा, अशक्तौ शतसर्षपतुलितं वा ततः विसर्जितदेवतापीठदानान्ते तिलदानं च कृत्वा, तत्र मंत्रः 'तिलाः कश्यपसंभूतास्तिलाः पापहराः शुभाः ॥ तिलपात्रप्रदानेन अतः शान्तिं प्रयच्छ मे ॥' इति । पुत्रादिकैः पुष्पमालावस्त्रादिना यजमानं (अहेर) सत्कृत्य पुरंध्रीभिः (सुवासिनीभिः) आचारात् यजमानस्य यावन्ति वयोवर्षाणि तावद्भिर्वा नीराजनैः (दीपैः) नीराजयित्वा, ब्राह्मणेभ्यः दक्षिणां दत्त्वा, तेभ्यः आशीर्वचनं गृहीत्वा, ब्राह्मणभोजनसंकल्पं कृत्वा, देवानभिवाद्य, कर्म परमेश्वरार्पणं कुर्यात् । द्विराचम्य, त्रिवारं विष्णुस्मरणं कुर्यात् इति ।

॥ इति प्राचीनग्रंथानुसारं नारायणशास्त्री जोशी-विरचिता वारुणी-शान्तिः समाप्ता ॥

॥ श्रीकृष्णार्पणमस्तु ॥

॥ अथ उग्ररथशान्तेर्मूलवचनानि ॥

* * * * * * * * * * * * * * * * *

[षष्टितमेवर्षे (६०) प्राप्ते क्रियमाणा ।]
अथाह शौनकः—शांतिकमलाकरे

"अथातः संप्रवक्ष्यामि शांतिं चोग्ररथस्य तु ।
ब्रह्मक्षत्रियवैश्यानां शूद्राणां चैव योषिताम् ॥ १ ॥

यदि स्यात्षष्टिवर्षे तु तदा मृत्युर्भवेत् ध्रुवम् ।
दुःस्वप्नानि च जायन्ते मातापित्रोर्मृतिस्तथा ॥ २ ॥

भार्यापुत्रवियोगश्च रोगव्याधिभयं तथा ।
गृहपीडा राजभयं रोगाश्च विविधाश्च ये ॥ ३ ॥

दन्तरोगा दृष्टिमान्द्यं छायाया विकृतिस्तथा ।
नक्षत्राणि न दृश्यन्ते ध्रुवादीन्यस्फुटानि च ॥ ४ ॥

भूतप्रेतपिशाचाद्या दृश्यन्ते विविधाश्च ये ।
एते चान्ये महोत्पाताः जायन्ते षष्टिवत्सरे ॥ ५ ॥

तद्दोषपरिहारार्थं शान्तिं वक्ष्यामि शौनक ।
लोभादनादरो यस्तु शान्तिकर्म न कारयेत् ॥ ६ ॥

तस्मिन् वर्षे भवेन्मृत्युः सत्यमेव न संशयः ।
तस्मिन् वर्षे जन्मदिने जन्मर्क्षे वा यदा भवेत् ॥ ७ ॥

तस्मिन् दिने तु संप्राप्ते मङ्गलं स्नानमाचरेत् ।
दैवज्ञोक्ते शुभे काले चन्द्रताराबलान्विते ॥ ८ ॥

नित्यकर्माणि निर्वर्त्य ब्राह्मणानभिमन्त्र्य च ।
आचार्यं वरयेदादौ वेदवेदाङ्गपारगम् ॥ ९ ॥

आचारवन्तं धर्मज्ञं शान्तिकर्मणि कोविदम् ।
कामक्रोधविहीनञ्च रागद्वेषविवर्जितम् ॥ १० ॥

गणेशं पूजयेदादौ ततः पुण्याहवाचनम् ।
मातृकाः पूजयित्वा तु नान्दीश्राद्धमतः परम् ॥ ११ ॥

आचार्यब्रह्मवरणमन्वाधानमतः परम् ।
सर्वौषधीः समानीय पञ्चत्वक् पञ्चपल्लवम् ॥ १२ ॥

पञ्चरत्नं पञ्चगव्यं पञ्चामृतमतः परम् ।
कलशञ्च समानीय ग्रहातिथ्यपुरस्सरम् ॥ १३ ॥

नवग्रहं समाराध्य मार्कण्डेयं प्रधानकम् ।
पलेन वा तदर्धेन तदर्धार्धेन वा पुनः ॥ १४ ॥

उग्ररथशान्तिकारिका ।

* * * * * * * * * * * * * * * * *

मार्कण्डेयस्य प्रतिमां कारयेच्च प्रयत्नतः ॥
प्रतिमां स्थापयेत् कुंभे वस्त्रयुग्मेन वेष्टयेत् ॥ १५ ॥

उपचारैः षोडशभिः संपूज्य च विधानतः ।
समिदाज्य-चरु-द्रव्यैर्दूर्वाभिः परमान्नकैः ॥ १६ ॥

अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
प्रत्येकं जुहुयादेतं मार्कण्डेयेति मन्त्रतः ॥ १७ ॥

हवनार्थ अयं मंत्रः ।—
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरारोग्यमैश्वर्यं देहि मे मुनिपुङ्गव ॥ १८ ॥

मृत्युञ्जयं समुद्दिश्य दूर्वाभिश्च तिलैः सह ।
अयुतं वा तदर्धार्धं त्रिसहस्रं वा सहस्रकम् ॥ १९ ॥

होमं कृत्वा विधानेन उपदेवान् यजेत्पृथक् ।
अश्वत्थामा बलिर्व्यासो हनुमांश्च बिभीषणः ॥ २० ॥

कृपः परशुरामश्च एतांश्चैव पृथक् पृथक् ।
लाजाहोमं प्रकुर्वीत यथाविभवविस्तरम् ॥ २१ ॥

श्रीसूक्तं रुद्रजाप्यं च आयुष्यं पुरुषसूक्तकम् ।
वेदपारायणं चैव कर्तव्यं तु प्रयत्नतः ॥ २२ ॥

होमशेषं समाप्याथ पूर्णाहुतिमतः परम् ।
कलशोदकमादाय अभिषेकं तु कारयेत ॥ २३ ॥

यजमानं सपत्नीकं बन्धुवर्गसमन्वितम् ।
शान्तिसूक्तं पुरुषसूक्तं परं मृत्योस्तथैव च ॥ २४ ॥

आयुष्यं पावमानं च शिवसङ्कल्पषड्ऋचम् ।
महाशान्तिं प्रजप्याथ कलशं च प्रदापयेत् ॥ २५ ॥

अभिषेकाप्लुतं वस्त्रमाचार्याय निवेदयेत् ।
सालङ्कारां सवत्साङ्गां आचार्याय निवेदयेत् ॥ २६ ॥

दशदानानि विप्रेभ्यः सुवर्णं शतमानकम् ।
आज्यस्यावेक्षणं कुर्यात् तिलदानं तथैव च ॥ २७ ॥

ब्राह्मणादाशिषो ग्राह्या नववस्त्रं तु धारयेत् ।
नीराजनं प्रकुर्वीत देवानामभिवादनम् ॥ २८ ॥

ब्राह्मणान् भोजयेत् पश्चात्सहस्रं वा शतं तु वा ।
बन्धुभिः सह भुञ्जीत दीर्घमायुश्च विन्दति ॥ २९ ॥

सर्वारिष्टविनाशश्च सर्वसंपद्भविष्यति ॥ इति ।

॥ इति उग्ररथशान्तिकारिकाः शान्तिकमलाकरे ॥

ग्रहाणामुत्तरतः (अत्र केचन–सर्वतोभद्रस्य (लिंगतोभद्रस्य वा) सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य तत्र ब्रह्मादि-मंडल-देवताः आवाह्य, संपूज्य, तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां देवतास्थापनमिच्छन्ति ।) महीद्यौरित्यादिविधिना कलशं संस्थाप्य, तत्र सर्वौषधीः पंचत्वचः पंचगव्यं क्षिप्त्वा, पूर्णपात्रनिधानान्ते उक्तलक्षण-सुवर्णप्रतिमायां देवतां मार्कण्डेयमहाभागेतिमंत्रेण आवाह्य, तथा अश्वत्थामादिसप्तचिरंजीवांश्च नाममंत्रेणावाह्य, वस्त्रयुग्मेनावेष्ट्य, षोडशोपचारैः संपूज्य, इध्माबर्हिषोश्च संनहनादि चक्षुषीहोमान्तं कृत्वा, यजमानेन द्रव्यत्यागे कृते, ग्रहादिहोमोत्तरं **मार्कण्डेय महाभाग सप्तकल्पान्तजीवन । आयुरारोग्यमैश्वर्यं देहि मे मुनिपुंगव स्वाहा ॥** इति हवनमंत्रेण समिधाज्य-चरु-दूर्वा-पायसानि, त्र्यंबकं इति मंत्रेण दूर्वातिलान् तिलमिश्रदूर्वा वा उक्तसंख्योक्ता हुत्वा, अश्वत्थाम्ने नमः स्वाहा । बलये० । व्यासाय० । हनूमते० । बिभीषणाय० । कृपाय० । परशुरामाय स्वाहा इति नाममंत्रैः प्रत्येकं २८ अष्टाविंशतिभिः अष्टाभिर्वा लाजाभिर्जुहुयात् । ततः स्विष्टकृतात् प्राक्, श्रीसूक्तं, रुद्राध्यायं च जप्त्वा आयुष्यमंत्रान् जपेत् । ते च–एष वां देवा ऋकद्वयं परावतो सप्तदशर्चं आ नो भद्रा दशर्चं इति वा इति आयुष्यमिति च सूक्तं पठेत् । ततः वेदपारायणं कार्यं तदसंभवे पुरुषसूक्तं अग्निमीळे इति नवर्चसूक्तं च पठेत् । ततः स्विष्टकृतादि प्रायश्चित्तहोमान्ते बलिदानं पूर्णाहुतिं च कृत्वा संस्त्रावादिहोमशेषं समाप्य, स्थापित–कलशोदकैः सकुटुंबं बंधुवर्गयुतं यजमानमभिषिंचेत् । तत्र मंत्राः समुद्रज्येष्ठा० शं न इन्द्राग्नी इति पञ्चदशर्चं, सहस्रशीर्षेति षोडशर्चं, परं मृत्यो० इति चतुर्दशर्चं, एष वां देवावितिद्वयो० परावतो य इति सप्तदशर्चं, स्वादिष्ठयेति दशर्चं अक्षिभ्यां षड्भिः, यज्जाग्रत इति षण्णाम् । ग्रहमंत्र–मुख्यदेवतामंत्रेत्यादीनां सर्वेषां अभिषेके विनियोगः ।

(अभिषेकमंत्राणां बाहुल्यात् यथावकाशं यथाशक्ति पाठः ।)

तच्छं यां इत्येतेनाभिषिक्तो यजमानः धृतशुक्लांबरगंधमाल्यो अभिषेकवस्त्रं आचार्याय दद्यात् । विभूतिं धृत्वा आचार्येण आ नो भद्रा इत्यादिमहाशांतिमंत्रजपपूर्वकं देवतोत्तरपूजने कृते मार्कण्डेयादीन् प्रार्थयेत (इयं प्रार्थना अन्ते द्रष्टव्या ।) । ततः आयुर्वृद्ध्यै सतिल-गुडसंमिश्रं दुग्धं प्राशयेत् । तत्र मंत्रः '**सतिलं गुडसंमिश्रं अंजल्यर्धमितं पयः । मार्कण्डेयात् वरं लब्ध्वा पिबाम्यायुर्विवृद्धये**' । इति पिबेत् । ततः आचार्यादीन् संपूज्य, आचार्याय मार्कण्डेयप्रतिमासहितं कलशं गां च दत्त्वा,

ब्राह्मणेभ्यः गवादिदशदानानि शतगुंजापरिमितं सुवर्णं तन्मूल्यं वा विभज्य विभज्य दद्यात् । अशक्तौ शतसर्षपतुलितं वा गवादीनां प्रत्यक्षदानासंभवे तन्मूल्यम् देयम् । ततः विसर्जितदेवतापीठदानान्ते कांस्यपात्रे आज्यं विलोक्य, तत्पात्रं सदक्षिणाकं ब्राह्मणाय दत्त्वा, तिलदानं च कृत्वा, तत्र मंत्रः 'तिलाः कश्यपसंभूतास्तिलाः पापहराः शुभाः । तिलपात्रप्रदानेन अतः शान्तिं प्रयच्छ मे ॥' इति । पुरंध्रीभिः नीराजितः बंधुवर्गैः सत्कृतः देवान् अभिवाद्य, यथाशक्ति ब्राह्मणभोजनं संकल्प्य, आशीर्वचनं गृहीत्वा, द्विराचम्य, यस्य स्मृत्येति विष्णुस्मरणं कृत्वा उत्तिष्ठेत् ।

॥ इति प्राचीनग्रंथानुसारं नारायणशास्त्री जोशी–विरचितः उग्ररथ–शान्तिप्रयोगः 'शांतिकमलाकर'स्थः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

ब्रह्मादिमंडळ देवतांची स्थाने



अथ मृत्युंजय-महारथी-शान्तेः प्रयोगदर्शनम् ।

* * * * * * * * * * * * * * * * *

प्रधानदेवता :	: मृत्युंजयमहारथः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: मा नो महान्त ।
हवनीयद्रव्याणि :	: समिध्-आज्य-चरु-पायसानि ।
हवनसंख्या :	: १००८ वा १०८ वा यथाशक्ति ।
उपदेवता :	: त्र्यंबकः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: त्र्यंबकं यजामहे ।
हवनीयद्रव्यं :	: घृताक्ततिलाः ।
हवनसंख्या :	: १००८ वा १०८ वा यथाशक्ति ।
नक्षत्रदेवता :	: यजमानस्य यद् जन्मनक्षत्रं तद् देवता ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: नाममंत्रः ।
हवनद्रव्यं :	: केवलं आज्यम् ।
आहुतिसंख्या :	: २८ वा ८ वा यथाशक्ति ।

सर्वशान्तीनां संकल्पस्वरूपं एकमेव । केवलं वयःसंख्याभेदः । सर्वासु शान्तिषु हवनसमाप्तौ स्विष्टकृतात् पूर्वं विविधसूक्तानि यजमानाय श्रावयेत् । अनन्तरम् स्विष्टकृतादि–प्रायश्चित्तहोमान्ते बलिदानम् पूर्णाहुतिं संस्रावादिहोमशेषं समाप्य कलशोदकैः यजमानं अभिषिंचेत् । नूतनवस्त्रान्ते विभूतिं धृत्वा देवतां सप्तचिरंजीवांश्च प्रार्थयेत । देवतोत्तरपूजनम्, दुग्धप्राशनम्, आज्यावलोकनम्, पीठदानम्, दशदानम्, शतगुंजासुवर्णदानम्, ब्राह्मणभोजनदक्षिणादानम् इत्यादीनां संकल्पः । यजमानं सत्कृत्य (अहेर) नीराजनविधिः, आशीर्वादः । त्रिवारं विष्णुस्मरणेन कर्मसमाप्तिं वाचयेत् इति । अयम् उत्तरांगविधिः सर्वत्र समानः ।

अथ मृत्युंजय-महारथी शान्तिः ।

[पञ्चाधिक-षष्टितमे वर्षे (६५) प्राप्ते क्रियमाणा ।]

अथ कर्ता यजमानः जन्मनः सकाशात् **पंचाधिक-षष्टितमे वर्षे प्राप्ते**, जन्मदिने जन्मनक्षत्रे चंद्रानुकूल्ये शुभेऽहनि वा कृताभ्यंगः कृतनित्यक्रियः, कृताग्निसिद्धः शुभे सवस्त्रपीठासने उपविश्य, यज्ञोपवीती, आचम्य, पवित्रपाणिः, प्राणानायम्य, पंचगव्य-प्राशनादिना शरीरशुद्धिं विधाय, सुवासिन्या कृतमंगलतिलकः देवतागुर्वादींश्चाभिवाद्य, ब्राह्मणैर्दत्तानुज्ञः स्वासने उपविश्य, पुनः आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रः अमुकशर्माऽहं मम जन्मनः सकाशात् **पंचाधिक-षष्टितमे वर्षे प्राप्ते** सूचित–संभाव्यमान–नानाविधरोग-दृष्टिमान्द्य-छायावैकृत्य-भार्या-पुत्रादिवियोग-धनधान्य-पशु-क्षयादि-विविध-अरिष्ट-निरसनार्थं जन्मराशि-जन्म-लग्नाभ्यां सकाशात् गोचरेण अनिष्टस्थानस्थित-आदित्यादि नवग्रहाणां उत्पन्नो-त्पत्स्यमानपीडानिरसनपूर्वकं सर्वसुखावाप्तिधनधान्याद्यभिवृद्ध्यर्थं समस्तमंगलप्राप्त्यर्थं देशकालाद्यनुसारतः विद्वदुपदिष्टेन विधिना यथाशक्तिसंभृतसंभारैः यथाज्ञानतः सग्रहमखां **महारथ–मृत्युंजय–देवता–प्रीत्यर्थं मृत्युंजय–महारथीं शान्तिं करिष्ये** । तदंगं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यवरणं च करिष्ये। तत्रादौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं करिष्ये इति संकल्प्य तानि कृत्वा, वृताचार्यः स्थंडिलसमीपमुपविश्य, आचम्येत्यादि० श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रोत्पन्नेन अमुकशर्मणा यजमानेन संकल्पित–**मृत्युंजय-महारथी-शान्ति**–कर्मणि वृतोऽहं यथाज्ञानतः देशकालाद्यनुसारेण एभिर्ब्राह्मणैः सह आचार्यकर्म करिष्ये । तदंगं शरीरशुद्ध्यर्थं पुरुषसूक्त–जप–पूर्वकम् भू–शुद्ध्यादि करिष्ये । आदौ निर्विघ्नार्थं महागणपतिस्मरणं च करिष्ये । इत्यादि गौरसर्षपविकिरणादि प्रादेशान्तं कर्म कृत्वा, स्थण्डिलात् पूर्वभागे वेदीं प्रकल्प्य, (अत्र केचन–सर्वतोभद्रस्य (लिंगतोभद्रस्य वा) सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य, तत्र ब्रह्मादि-मंडल-देवताः आवाह्य, संपूज्य, तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां देवता-स्थापनमिच्छन्ति ।) सवस्त्रपीठासने तण्डुलराश्युपरि महीद्यौरित्यादिना कलशं प्रतिष्ठाप्य, वरुणप्रार्थनान्तं कृत्वा, पूर्णपात्रे अष्टदलमध्ये कर्णिकायां कृताग्न्युत्तारण-पूर्विकायां सुवर्णप्रतिमायां **प्रधानदेवं मृत्युंजयमहारथं आवाहयेत् मा नो महान्त इति मंत्रेण । तद्यथा मा नो महान्त इति मंत्रस्य आंगिरसकुत्सो मृत्युंजय–महारथरुद्रो जगती मृत्युंजयमहारथरुद्रावाहने विनियोगः ।**

ॐ मा नो महान्तमुत मा नोऽअर्भकं
मा नऽउक्षन्तमुतमा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं
मा नः प्रियाः स्तन्वो रुद्र रीरिषः ॥

(ऋ-अ-१, अ-८, वर्ग-६)

यजमानः तैत्तिरीयशाखीयश्चेत् रुद्रपाठस्थो मंत्रो ग्राह्यः ।

अस्यां सुवर्णमय्यां मूर्तौ प्रधानदेवतां मृत्युंजयमहारथरुद्रं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि । ॐ भूः मृत्युंजयं महारथं रुद्रं आवा० । ॐ भुवः मृत्युंजयं महारथं रुद्रं आवा० । ॐ स्वः मृत्युंजयं महारथं रुद्रं आवा० । ॐ भूर्भुवःस्वः मृत्युंजयं महारथं रुद्रं आवा० । तदुत्तरतः त्र्यंबकेति मंत्रेण **त्र्यंबकं** आवाह्य, तदुत्तरतः **नक्षत्रदेवतां** नाममंत्रेणावाह्य, काण्डानुसमयेन पदार्थानुसमयेन वा सर्वान् संपूज्य, प्रधानदेवतासमीपे तन्मंत्रं (मा नो महान्त०) अष्टोत्तरशतं अष्टाविंशतिवारं वा जप्त्वा, स्थंडिलान्तिकमेत्य, अद्येत्यादि० संकल्पित-मृत्युंजय-महारथी-शांतिकर्मणि स्थंडिलादिसकलं कर्म करिष्ये । वरदनामानमग्निं प्रतिष्ठाप्य, ध्यात्वा, ध्यानान्ते देवतोत्तरवेद्यां आदित्यादिनवग्रहानावाह्य, संपूज्य, देवदानवसंवादे० इति वरुणप्रार्थनान्तं कृत्वा स्थंडिलसमीपमेत्य समिद्द्वयेत्यन्वादध्यात् । चक्षुष्यन्तं उक्त्वा ग्रहानन्वादध्यात् । **अत्र प्रधानं देवं मृत्युंजयं महारथं रुद्रं, मा नो महान्त-मंत्रेण समिध्-आज्य-चरु-पायस-द्रव्यैः चतुर्भिः प्रतिद्रव्यं (अष्टोत्तरसहस्र)/ अष्टोत्तरशतसंख्याकाभिराहुतिभिर्वा, मृत्युंजय–त्र्यंबकं घृताक्ततिलद्रव्येण सहस्रसंख्याकाहुतिभिः नक्षत्रदेवतां नाममंत्रेण अष्टाविंशति वा अष्टसंख्याका-भिर्वाज्यद्रव्येण यक्ष्ये ।** शेषेण स्विष्टकृतमिति चक्षुष्यन्तं कर्म कृत्वा यजमानेन द्रव्यत्यागे कृते, ग्रहहोमं प्रधानादिहोमं विधाय **स्विष्टकृतात्** प्राक् **विविधसूक्त-पाठजपः कार्यः** । तानि च सूक्तानि, श्रीसूक्तं, रुद्राध्यायं, आयुष्यमंत्रान् जपेत् । ते च ऋक्द्वयं एष वां देवा परावतो सप्तदशर्चं, आ नो भद्रा दशर्चं, इति वा इति आयुष्यमिति च सूक्तं पठेत् । ततः जप्त्वा वेदपारायणं कार्यं; तदसंभवे पुरुषसूक्तं अग्निमीळे इति नवर्चं सूक्तं च पठेत् । ततः स्विष्टकृतादि-प्रायश्चित्तहोमान्ते बलिदानं पूर्णाहुतिं च कृत्वा, संस्रावादिहोमशेषं समाप्य, स्थापितकलशोदकैः सकुटुंबं बंधुवर्गयुतं यजमानं अभिषिंचेत् । तत्र अभिषेकमंत्राः–समुद्रज्येष्ठा० शं न इंद्राग्नी० परं मृत्यो० एष वां देवा इति ऋग्द्वयं० परावतो सप्तदशर्चं, स्वादिष्टयेति दशर्चं, अक्षिभ्यां षट्भिः, यज्जाग्रत इति षण्णाम् । ग्रहमंत्रमुख्यदेवतामंत्रेत्यादीनां सर्वेषां अभिषेके विनियोगः ।

(अभिषेकमंत्राणां बाहुल्यात् यथावकाशं यथाशक्ति पाठः ।)

ततो यजमानः अभिषेकवस्त्रं परित्यज्य, धृतशुक्लांबरः, अभिषेकवस्त्रं आचार्याय दद्यात् । विभूतिं धृत्वा आ नो भद्रा इति महाशांतिजपपूर्वकं देवतोत्तरपूजने कृते, मार्कंडेयादीन् प्रार्थयेत । ततः आयुर्वृद्ध्यै सतिलगुडसंमिश्रं दुग्धं प्राशयेत् । तत्र मंत्रः **'सतिलं गुडसंमिश्रं अंजल्यर्धमितं पयः मार्कंडेयात् वरं लब्ध्वा पिबाम्या-युर्विवृद्धये ।'** इति पिबेत् । ततः कांस्यपात्रे घृतमासिच्य, तत्र **'रूपं रूपं'** इति मंत्रेण आज्यावलोकनं कृत्वा, तत्पात्रं सदक्षिणाकं ब्राह्मणाय दत्त्वा, गो-भू-तिल-हिरण्यादि दशदानानि कानिचित् प्रत्यक्षाणि, कानिचित् निष्क्रयद्वारा, सर्वाणि वा निष्क्रयरूपेण ब्राह्मणेभ्यो दत्त्वा, तथा शतगुंजापरिमितं सुवर्णं, तन्निष्क्रयं वा विभज्य विभज्य ब्राह्मणेभ्यो दत्त्वा, अशक्तौ शतसर्षपतुलितं वा ततः विसर्जितदेवतापीठदानान्ते तिलदानं च कृत्वा, तत्र मंत्रः 'तिलाः कश्यपसंभूतास्तिलाः पापहराः शुभाः । तिलपात्रप्रदानेन अतः शान्तिं प्रयच्छ मे ॥' इति । पुत्रादिकैः पुष्पमालावस्त्रादिना यजमानं (अहेर) सत्कृत्य, पुरंध्रीभिः (सुवासिनीभिः) आचारात् यजमानस्य यावन्ति वयोवर्षाणि तावद्भिर्वा नीराजनैः (दीपैः) नीराजयित्वा, ब्राह्मणेभ्यो दक्षिणां दत्त्वा, तेभ्यः आशीर्वचनं गृहीत्वा, ब्राह्मणभोजनसंकल्पं कृत्वा, देवानभिवाद्य, कर्म परमेश्वरार्पणं कुर्यात् । द्विराचम्य, त्रिवारं विष्णुस्मरणं कुर्यात् इति ।

॥ इति प्राचीनग्रंथानुसारं नारायणशास्त्री जोशी–विरचिता
मृत्युंजय-महारथी-शान्तिः समाप्ता ।

॥ श्रीकृष्णार्पणमस्तु ॥

अथ भैमरथी-शान्ति-प्रयोगः ।

* * * * * * * * * * * * * * * * *

तत्रादौ मूलवचनानि । तदुक्तं बृहच्छौनकीये ॥

'अथ भैमरथीं शान्तिं भगवान् शौनकोऽब्रवीत्
जननात्सप्ततौ वर्षे मृत्युर्भीमरथो भवेत् ॥ १ ॥

षष्मासान्मृत्युमाप्नोति धनहानिं तथैव च
पुत्रदारादिनाशश्च द्रव्यधान्यपशुक्षयः ॥ २ ॥

तद्दोषशमनार्थाय भगवान् शौनकोऽब्रवीत्
जन्मर्क्षे वानुकूलर्क्षे शान्तिं कुर्याद्विचक्षणः ॥ ३ ॥

देवालये नदीतीरे स्वगृहे वा शुभे स्थले
गृहस्यैशानदिग्भागे मण्डपं कारयेदथ ॥ ४ ॥

व्रीहिभारं तु निक्षिप्य तण्डुलांस्तु तदर्धकम्
तदर्धं तिलभारः स्यात् पद्ममष्टदलं स्मृतम् ॥ ५ ॥

तस्योपरि न्यसेत्कुंभान् तंतुवस्त्रादिवेष्टितान्
ह्रींकारोपरि विन्यस्य भीमं मृत्युंजयं यजेत् ॥ ६ ॥

पलमात्रं सुवर्णेन तदर्धार्धेन वा पुनः
महावरुणमभ्यर्च्य लोकपालादिकानथ ॥ ७ ॥

अधि-प्रत्यधि-देवौ च तदर्धेन प्रकल्पयेत्
आचार्यं वरयित्वा तु ऋत्विजो वरयेदथ ॥ ८ ॥

उपचारैः षोडशभिः प्रधानं देवमर्चयेत्
यथोक्तपूजां कृत्वा तु तत्तन्मंत्रान् जपेदथ ॥ ९ ॥

स्तुहि श्रुतेति मंत्रेण प्रधानं जपमाचरेत्
वेदपारायणजपं ततो द्वारजपं तथा ॥ १० ॥

नमकं चमकं चैव श्रीसूक्तं भीमसूक्तकम्
मण्डपात्पश्चिमे भागे कुण्डं स्याच्चतुरस्रकम् ॥ ११ ॥

स्वसूत्रोक्तेन मार्गेण आज्यभागान्तमाचरेत्
प्रधानमंत्रकैः कुर्यात् समिच्चर्वाज्यकैः क्रमात् ॥ १२ ॥

नवग्रहाणां मंत्रेण तिलद्रव्येण कारयेत्
अष्टोत्तरं सहस्रं वा अष्टोत्तरशतं तथा ॥ १३ ॥

प्रधानहोमः कर्तव्यः तिलैर्होमस्तथैव च
वरुणं लोकपालांश्च ह्यधिप्रत्यधिदेवते ॥ १४ ॥

ततः स्विष्टकृतं हुत्वा ग्रहयज्ञं समापयेत्
यजमानाभिषेकं च आचार्यः कारयेदथ ॥ १५ ॥

कुंभदानं ततः कुर्यात् दश दानानि कारयेत्
दीनांधकदरिद्रेभ्यः भूरिदानं समाचरेत् ॥ १६ ॥

ब्राह्मणान् भोजयेत् पश्चादाशिषो वाचयेदथ
सर्वदुःखनिवृत्तिः स्यात् सर्वदा सुखमेधते ॥ १७ ॥

शत्रवोऽपि वशं यान्ति पुत्रपौत्रप्रवर्धनम्
हरिमेव स्मरेन्नित्यं कर्म पूर्वापरेऽपि च ॥ १८ ॥

इति बृहच्छौनकीये सप्तत्यब्दिका भैमरथी शान्तिः ॥

अथ भैमरथी–शान्तेः प्रयोगदर्शनम् ।

* * * * * * * * * * * * * * * * * *

प्रधानदेवता :	: भीमरथ-मृत्युंजय-रुद्रः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: स्तुहि श्रुतमिति ।
हवनीयद्रव्यं :	: घृताक्ततिलाः ।
हवनसंख्या :	: १००८ वा १०८ वा यथाशक्ति ।
अधिदेवता :	: वरुणः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: अवते हेळो० ।
हवनीयद्रव्यं :	: घृताक्ततिलाः ।
हवनसंख्या :	: २८ वा ८ वा यथाशक्ति ।
प्रत्यधिदेवता :	: आशापालः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: आशानामाशा ।
हवनीयद्रव्यं :	: घृताक्ततिलाः ।
हवनसंख्या :	: २८ वा ८ वा यथाशक्ति ।
उपदेवता :	: त्र्यंबकः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: त्र्यंबकं यजामहे ।
हवनीयद्रव्यं :	: घृताक्ततिलाः ।
हवनसंख्या :	: २८ वा ८ वा यथाशक्ति ।
नक्षत्रदेवता :	: यजमानस्य जन्मनक्षत्रं तद् देवता ।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: नाममंत्रः ।
हवनीयद्रव्यं :	: आज्यम् ।
हवनसंख्या :	: २८ वा ८ वा यथाशक्ति ।

सर्वशान्तीनां संकल्पस्वरूपं एकमेव। केवलं वयःसंख्याभेदः। सर्वासु शान्तिषु हवनसमाप्तौ स्विष्टकृतात् पूर्वं विविधसूक्तानि यजमानाय श्रावयेत् । अनन्तरम् स्विष्ट-कृतादि–प्रायश्चित्तहोमान्ते बलिदानम् पूर्णाहुतिं संस्रावादिहोमशेषं समाप्य कलशोदकैः यजमानं अभिषिंचेत् । नूतनवस्त्रान्ते विभूतिं धृत्वा देवतां सप्तचिरंजीवांश्च प्रार्थयेत । देवतोत्तरपूजनम्, दुग्धप्राशनम्, आज्यावलोकनम्, पीठदानम्, दशदानम्, शतगुंजासुवर्णदानम्, ब्राह्मणभोजनदक्षिणादानम् इत्यादीनां संकल्पः। यजमानं सत्कृत्य (अहेर) नीराजनविधिः, आशीर्वादः ।

त्रिवारं विष्णुस्मरणेन कर्मसमाप्तिं वाचयेत् इति । अयम् उत्तरांगविधिः सर्वत्र समानः ।

अथ भैमरथी शान्तिः ।

[सप्ततितमे वर्षे (७०) क्रियमाणा ।]

अथ कर्ता यजमानः जन्मनः सकाशात् **सप्ततितमे वर्षे प्राप्ते**, जन्मदिने, जन्म-नक्षत्रे, चन्द्रानुकूल्ये शुभेऽहनि वा, कृताभ्यंगः, कृतनित्यक्रियः, कृताग्निसिद्धिः, शुभे सवस्त्रपीठासने उपविश्य, यज्ञोपवीती, आचम्य, पवित्रपाणिः प्राणानायम्य, पंचगव्य-प्राशनादिना शरीरशुद्धिं विधाय, सुवासिन्या कृतमंगलतिलकः देवतागुर्वादींश्चाभिवाद्य, ब्राह्मणैर्दत्तानुज्ञः स्वासने उपविश्य, पुनः आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रः अमुकशर्माऽहं मम जन्मनः सकाशात् **सप्ततितमे** वर्षे प्राप्ते सूचित–संभाव्यमान–नानाविधरोग–दृष्टिमान्द्य–छायावैकृत्य–भार्यापुत्रादि-वियोग–धनधान्यपशुक्षयादि–अरिष्ट–निरसनार्थं जन्मराशिजन्मलग्नाभ्यां सकाशात् गोचरेण अनिष्टस्थानस्थित–आदित्यादि–नवग्रहाणां उत्पन्नोत्पत्स्यमान–पीडापरिहार-पूर्वकं सर्वसुखावाप्तिधनधान्याद्यभिवृद्ध्यर्थं समस्तमंगलप्राप्त्यर्थं देशकालाद्यनुसारतः विद्वदुपदिष्टेन विधिना यथासंभृतसंभारैः यथाशक्ति यथाज्ञानतः सग्रहमखां **शौनकोक्तां भैमरथीं शान्तिं करिष्ये** । तदंगं स्वस्ति–पुण्याहवाचनं, मातृकापूजननांदीश्राद्धं, आचार्यवरणं च करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं करिष्ये । इति संकल्प्य, तानि कृत्वा वृताचार्यः स्थंडिलसमीपमुपविश्य, आचम्येत्यादि० श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रोत्पन्नेन अमुकशर्मणा यजमानेन संकल्पित–**भैमरथी-शान्तिकर्मणि** वृतोऽहं यथाज्ञानतः देशकालाद्यनुसारेण एभिर्ब्राह्मणैः सह आचार्यकर्म करिष्ये । तदंगं शरीरशुद्ध्यर्थं पुरुषसूक्त–जप–पूर्वकम् भू–शुद्ध्यादि करिष्ये, आदौ निर्विघ्नार्थं महागणपति स्मरणं च करिष्ये । इत्यादि गौरसर्षपविकिरणादि प्रादेशान्तं कर्म कृत्वा, स्थण्डिलात् पूर्वभागे वेदीं प्रकल्प्य, (अत्र केचन–सर्वतोभद्रस्य (लिंगतो भद्रस्य वा) सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य, तत्र ब्रह्मादि–मंडल–देवताः आवाह्य, संपूज्यं, तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां देवतास्थापनमिच्छन्ति ।) सवस्त्रपीठासने व्रीहिराशिं, तदुपरि तण्डुलराशिं, तदुपरि तिलराशिं च कृत्वा महीद्यौरित्यादिना कलशत्रयं (एकं वा कलशं) संस्थाप्य, पूर्णपात्रे अष्टदले ऱ्हीं-कारोपरि कर्णिकायां कृताग्न्युत्तारणपूर्विकायां सुवर्णप्रतिमायां स्तुहि श्रुतमिति मंत्रेण भीमरथं मृत्युंजयं प्रतिष्ठाप्य, तद्दक्षिणे अधिदेवतां महावरुणं, उत्तरतः प्रत्यधिदेवतां आशापालांश्च प्रतिष्ठापयेत् । तत्र मंत्रः यथा । **स्तुहि श्रुतमित्यस्य शौनको गृत्समदो भीमो मृत्युंजय-रुद्रस्त्रिष्टुप् । भीमरथ-मृत्युंजयरुद्र–आवाहने विनियोगः ।**

ॐ स्तुहि श्रुतं गर्तसदं युवानं
मृगं न भीममुपहत्नुमुग्रम् ।
मृळा जरित्रे रुद्र स्तवानो
ऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥

(अष्टक-२, अ-७, वर्ग-१८)

यजमानः तैत्तिरीयशाखीयश्चेत् रुद्रपाठस्थो वा मंत्रो ग्राह्यः ।

(ऋक्शाखोक्तमंत्रः, न तु रुद्रपाठस्थः ।)

अस्यां सुवर्णमय्यां मूर्तौ प्रधानदेवतां भीमरथ-मृत्युंजय-रुद्राय नमः । भीमरथ-मृत्युंजय-रुद्रं सांगं सपरिवारं सायुधं सशक्तिकं आवाहयामि । ॐ भूः भीमरथ-मृत्युंजय-रुद्रं आवा० । ॐ भुवः भीमरथ-मृत्युंजय-रुद्रं आवा० । ॐ स्वः भीमरथ-मृत्युंजय-रुद्रं आवा० । ॐ भूर्भुवः स्वः भीमरथ-मृत्युंजय-रुद्रं आवा० । तद्दक्षिणतः (कलशे) **अव ते हेळ इत्यस्य आजीगर्तिः शुनःशेपो वरुणस्त्रिष्टुप् । वरुणावाहने विनियोगः ।**

अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे
हविर्भिः । क्षयन्नस्मभ्यमसुर प्रचेता
राजन्नेनांसि शिश्रथः कृतानि ॥

(अ-१, अ-२. वर्ग-१५)

अस्यां सुवर्णमय्यां मूर्तौ (पूगीफले वा) ॐ भूर्भुवःस्वः वरुणाय नमः, वरुणं आवाहयामि । भूरित्यादि आवाह्य । वामपार्श्वे आशापालानावाह्य । यस्य वाक्यं स ऋषिर्या तेनोच्यते सा देवता, यदक्षरपरिमाणं तच्छंदः, आशापालावाहने विनियोगः । (एकश्रुत्या पाठः ।)

ॐ आशानामाशापालेभ्यो वाशानामाशा-
पालेभ्यश्चतुर्भ्यो अमृतेभ्यः ।
इदं भूतस्याध्यक्षेभ्यो विधेम हविषा वयम् ।
विश्वा आशामधुना संस्पृजाम्यनमीवा आप
ओषधयः सन्तु सर्वाः ।
अयं यजमानो मृधे व्यस्यत्व गृभीताः पशवः
सन्तु सर्वे । इति सौत्रमंत्रः ।

अस्यां सुवर्णमय्यां मूर्तौ आशापालेभ्यो नमः । आशापालानावाहयामि । भूः इत्यादि आवाह्य । तदुत्तरतः त्र्यंबकेति मंत्रेण **त्र्यंबकं** आवाह्य । तदुत्तरतः **नक्षत्रदेवतां** नाममंत्रेणावाह्य, काण्डानुसमयेन पदार्थानुसमयेन वा सर्वान् संपूज्य, प्रधानदेवतासमीपे तन्मंत्रं (स्तुहि श्रुतं गर्त०) अष्टोत्तरशतं अष्टाविंशतिवारं वा जप्त्वा, स्थंडिलान्तिकमेत्य, अद्येत्यादि० संकल्पित-**भैमरथी**-शांतिकर्मणि स्थंडिलादि-सकलं कर्म करिष्ये । वरदनामानमग्निं प्रतिष्ठाप्य, ध्यात्वा, ध्यानान्ते देवतोत्तरवेद्यां आदित्यादिनवग्रहा-नावाह्य, संपूज्य, देवदानवसंवादे० इति वरुणप्रार्थनान्तं कृत्वा, स्थंडिलसमीपमेत्य समिद्द्वयेत्यन्वादध्यात् । चक्षुष्यन्तं उक्त्वा ग्रहानन्वादध्यात् । **अत्र प्रधानं देवं भीमरथं मृत्युंजय-रुद्रंस्तुहि श्रुतमिति मंत्रेण अष्टोत्तरसहस्र (१००८) संख्याकाहुतिभिः घृताक्ततिलैः अष्टोत्तरशताहुतिभिर्वा (१०८) अधिदेवताप्रत्यधिदेवते च तैरेव द्रव्यैः अष्टोत्तरशतसंख्याकाभिः, अष्टाविंशतिसंख्याभिर्वा मृत्युंजयं त्र्यंबकं त्र्यंबकेतिमंत्रेण घृताक्ततिलद्रव्येण सहस्रसंख्याकाहुतिभिः, नक्षत्रदेवतां नाममंत्रेण अष्टाविंशति-अष्टसंख्याकाभिर्वाज्यद्रव्येण यक्ष्ये।** शेषेण स्विष्टकृतमिति चक्षुष्यन्तं कर्म कृत्वा यजमानेन द्रव्यत्यागे कृते, ग्रहहोमं प्रधानादिहोमं विधाय **स्विष्टकृतात्** प्राक् **विविधसूक्तपाठजपः कार्यः** । तानि च सूक्तानि—श्रीसूक्तं, रुद्राध्यायं, आयुष्य-मंत्रान् जपेत् । ते च ऋक्-द्वयं एष वां देवा रावतो सप्तदशर्चं, आ नो भद्रा दशर्चं, इति वा इति आयुष्यमिति च सूक्तं पठेत् ।

ततः वेदपारायणं कार्यं, तदसंभवे पुरुषसूक्तं अग्निमीळे इति नवर्चंसूक्तं च पठेत्। तत स्विष्टकृतादि प्रायश्चित्तहोमान्ते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावादिहोमशेषं समाप्य, स्थापितकलशोदकैः सकुटुंबं बंधुवर्गयुतं यजमानं अभिषिंचेत्। तत्र अभिषेकमंत्राः– समुद्रज्येष्ठा॰ शं न इंद्राग्नी॰ परं मृत्यो॰ एष वां देवा ऋग्द्वयं॰ परावतो सप्तदशर्चं, स्वादिष्टयेति दशर्चं, अक्षिभ्यां षड्भिः, यज्जाग्रत इति षण्णाम्। ग्रहमंत्र-मुख्यदेवतामंत्रेत्यादीनां सर्वेषां अभिषेके विनियोगः।

(अभिषेकमंत्राणां बाहुल्यात् यथावकाशं यथाशक्ति पाठः।)

ततो यजमानः अभिषेकवस्त्रं परित्यज्य, धृतशुक्लांबरः, अभिषेकवस्त्रं आचार्याय दद्यात्। विभूतिं धृत्वा आ नो भद्रा इति महाशांतिजपपूर्वकं देवतोत्तरपूजने कृते, मार्कंडेयादीन् प्रार्थयेत। ततः आयुर्वृद्ध्यै सतिलगुडसंमिश्रं दुग्धं प्राशयेत्। तत्र मंत्रः **'सतिलं गुडसंमिश्रं अंजल्यर्धमितं पयः। मार्कंडेयात् वरं लब्ध्वा पिबाम्यायुर्विवृद्धये।** इति पिबेत्। ततः कांस्यपात्रे घृतमासिच्य, तत्र **'रूपं रूपं'** इति मंत्रेण आज्यावलोकनं कृत्वा तत्पात्रं, सदक्षिणाकं ब्राह्मणाय दत्त्वा गो-भू-तिल-हिरण्यादि-दशदानानि कानिचित् प्रत्यक्षाणि, कानिचित् निष्क्रयद्वारा, सर्वाणि वा निष्क्रयरूपेण ब्राह्मणेभ्यः दत्त्वा, तथा शतगुंजापरिमितं सुवर्णं, तन्निष्क्रयं वा विभज्य विभज्य ब्राह्मणेभ्यो दत्त्वा, अशक्तौ शतसर्षपतुलितं वा, ततः विसर्जितदेवतापीठदानान्ते तिलदानं च कृत्वा, तत्र मंत्रः 'तिलाः कश्यपसंभूतास्तिलाः पापहराः शुभाः॥ तिलपात्रप्रदानेन अतः शान्तिं प्रयच्छ मे॥' इति। पुत्रादिकैः पुष्पमालावस्त्रादिना यजमानं (अहेर) सत्कृत्य पुरंध्रीभिः (सुवासिनीभिः) आचारात् यजमानस्य यावन्ति वयोवर्षाणि तावद्भिर्वा नीराजनैः (दीपैः) नीराजयित्वा, ब्राह्मणेभ्यः दक्षिणां दत्त्वा, तेभ्यः आशीर्वचनं गृहीत्वा, ब्राह्मणभोजनसंकल्पं कृत्वा, देवानभिवाद्य, कर्म परमेश्वरार्पणं कुर्यात्। द्विराचम्य, त्रिवारं विष्णुस्मरणं कुर्यात् इति।

॥ इति प्राचीनग्रंथानुसारं नारायणशास्त्री जोशी–विरचिता भैमरथी–शान्तिः समाप्ता ॥

॥ श्रीकृष्णार्पणमस्तु ॥

अथ ऐंद्री–शान्तेः प्रयोगदर्शनम्।

* * * * * * * * * * * * * * * * * *

प्रधानदेवता : : इंद्रः कौशिकः।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : आ तू न इंद्र॰।
हवनीयद्रव्याणि : : समिद्-आज्य-चरु-पायसानि।
हवनसंख्या : : १००८ वा १०८ वा यथाशक्ति।
परिवारदेवता : : सहस्राक्षादयः ८।
हवनीयद्रव्याणि : : समिद्-आज्य-चरु-पायसानि।
हवनसंख्या : : २८ वा ८ वा यथाशक्ति।
उपदेवता : : त्र्यंबकः।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : त्र्यंबकं यजामहे।
हवनीयद्रव्यं : : घृताक्ततिलाः।
हवनसंख्या : : १००८ वा १०८ वा यथाशक्ति।
नक्षत्रदेवता : : यजमानस्य जन्मनक्षत्रं तद् देवता।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : नाममंत्रः।
हवनीयद्रव्यं : : आज्यम्।
हवनसंख्या : : २८ वा ८ वा यथाशक्ति।

सर्वशान्तीनां संकल्पस्वरूपं एकमेव। केवलं वयःसंख्याभेदः। सर्वासु शान्तिषु हवनसमाप्तौ स्विष्टकृतात् पूर्वं विविधसूक्तानि यजमानाय श्रावयेत्। अनन्तरम् स्विष्टकृतादि प्रायश्चित्तहोमान्ते बलिदानम् पूर्णाहुतिं संस्रावादिहोमशेषं समाप्य, कलशोदकैः यजमानं अभिषिंचेत्। नूतनवस्त्रान्ते विभूतिं धृत्वा देवतां सप्तचिरंजीवांश्च प्रार्थयेत। देवतोत्तरपूजनम्, दुग्धप्राशनम्, आज्यावलोकनम्, पीठदानम्, दशदानम्, शतगुंजासुवर्णदानम्, ब्राह्मणभोजनदक्षिणादानम् इत्यादीनां संकल्पः। यजमानं सत्कृत्य (अहेर) नीराजनविधिः, आशीर्वादः। त्रिवारं विष्णुस्मरणेन कर्मसमाप्तिं वाचयेत् इति। अयम् उत्तरांगविधिः सर्वत्र समानः।

अथ ऐंद्री शान्तिः ।

[पञ्चाधिकसप्ततितमे वर्षे (७५) क्रियमाणा ।]

अथ कर्ता यजमानः जन्मनः सकाशात् **पञ्चाधिकसप्ततितमे वर्षे प्राप्ते**, जन्मदिने, जन्मनक्षत्रे, चंद्रानुकूल्ये शुभेऽहनि वा कृताभ्यंगः, कृतनित्यक्रियः, कृताग्निसिद्धिः, शुभे सवस्त्रपीठासने उपविश्य, यज्ञोपवीती, आचम्य, पवित्रपाणिः प्राणानायम्य, पंचगव्यप्राशनादिना शरीरशुद्धिं विधाय, सुवासिन्या कृतमंगलतिलकः देवतागुर्वादींश्चाभिवाद्य, ब्राह्मणैर्दत्तानुज्ञः स्वासने उपविश्य, पुनः आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य, श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रः अमुकशर्माऽहं मम जन्मनः सकाशात् **पञ्चाधिकसप्ततितमे वर्षे** प्राप्ते सूचित–संभाव्यमान–नानाविधरोग–दृष्टिमान्द्य–छायावैकृत्य–भार्यापुत्रादिवियोग–धनधान्यपशुक्षयादि–अरिष्ट-निरसनार्थं जन्मराशिजन्मलग्नाभ्यां सकाशात् गोचरेण अनिष्टस्थानस्थित–आदित्यादि–नवग्रहाणां उत्पन्नोत्पत्स्यमान-पीडापरिहारपूर्वकं सर्वसुखावाप्तिधनधान्याद्यभिवृद्ध्यर्थं समस्तमंगलप्राप्त्यर्थं देशकालाद्यनुसारतः विद्वदुपदिष्टेन विधिना यथा–संभृत-संभारैः यथाशक्ति यथाज्ञानतः सग्रहमखां **शौनकोक्तां ऐंद्री शांतिं करिष्ये** । तदंगं स्वस्ति–पुण्याहवाचनं, मातृकापूजननांदीश्राद्धं, आचार्यवरणं च करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं च करिष्ये । इति संकल्प्य, तानि कृत्वा, वृताचार्यः, स्थंडिलसमीपमुपविश्य, आचम्येत्यादि० श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रोत्पन्नेन अमुकशर्मणा यजमानेन संकल्पित–**ऐंद्री शांति**–कर्मणि वृतोऽहं यथाज्ञानतः देशकालाद्यनुसारेण एभिर्ब्राह्मणैः सह आचार्यकर्म करिष्ये । तदंगं शरीरशुद्ध्यर्थं पुरुषसूक्त–जप–पूर्वकम् भू–शुद्ध्यादि करिष्ये । आदौ निर्विघ्नार्थं महागणपति स्मरणं च करिष्ये । इत्यादि गौरसर्षपविकिरणादि प्रादेशान्तं कर्म कृत्वा, स्थण्डिलात् पूर्वभागे वेदीं प्रकल्प्य, (अत्र केचन-सर्वतोभद्रस्य (लिंगतोभद्रस्य वा) सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य, तत्र ब्रह्मादि-मंडल-देवताः आवाह्य, संपूज्य, तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां देवतास्थापनमिच्छन्ति ।) सवस्त्रपीठासने तण्डुलराश्युपरि महीद्यौरित्यादिना कलशं प्रतिष्ठाप्य, वरुणप्रार्थनान्तं कृत्वा, पूर्णपात्रे अष्टदलमध्ये कर्णिकायां कृताग्न्युत्तारणपूर्विकायां सुवर्णप्रतिमायां–**इंद्रकौशिकम् आ तू न इंद्र कौशिक** इति मंत्रेण **प्रधानदेवं इंद्रकौशिकम्** आवाहयेत् । **तद्यथा–आ तू न इंद्र** कौशिकेत्यस्य **मधुच्छंदावैश्वामित्र इंद्रोनुष्टुप्** इंद्रकौशिकावाहने **विनियोगः** ।

आ तू न इन्द्र कौशिक
मन्दसानः सुतं पिब ।
नव्यमायुः प्र सू तिर
कृधी सहस्रसामृषिम् ॥

(अ–१, अ–१, वर्ग–२०)

अस्यां सुवर्णमय्यां मूर्तौ प्रधानदेवतां इंद्रकौशिकम् साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि । ॐ भूः इंद्रकौशिकम् आवा० । ॐ भुवः इंद्रकौशिकम् आवा० । ॐ स्वः इंद्रकौशिकम् आवा० । ॐ भूर्भुवःस्वः इंद्रकौशिकम् आवा० । इंद्रकौशिकपरितः पूर्वादि–अष्टदिक्षु पूगीफले सहस्राक्षादीन् आवाहयेत् । तद्यथा पूर्वादि-अष्टदिक्षु सर्वत्र ओंकारः सहस्राक्षाय नमः । सहस्राक्षं आवाहयामि । शतक्रतवे नमः । शतक्रतुं आवाहयामि । वज्रपाणये नमः । वज्रपाणिमावाहयामि । पुरंदराय नमः । पुरंदरं आवाहयामि । अभयंकराय नमः । अभयंकरं आवाहयामि । शचीपतये नमः । शचीपतिम् आवाहयामि । स्वर्गाधिपाय नमः । स्वर्गाधिपं आवाहयामि । इंद्राय नमः । इंद्रं आवाहयामि इति क्रमेण । तदुत्तरतः त्र्यंबकेति मंत्रेण **त्र्यंबकं** आवाह्य, तदुत्तरतः **नक्षत्रदेवतां** नाममंत्रेणावाह्य, काण्डानुसमयेन पदार्थानुसमयेन वा सर्वान् संपूज्य, प्रधानदेवतासमीपे तन्मंत्रं (ध्रुवासु त्वा 'आ तू न इन्द्र कौशिक' इति) अष्टोत्तरशतं अष्टाविंशतिवारं वा जप्त्वा, स्थंडिलान्तिकमेत्य, अद्येत्यादि० संकल्पित-ऐन्द्री-शांतिकर्मणि स्थंडिलादिसकलं कर्म करिष्ये । वरदनामानमग्निं प्रतिष्ठाप्य, ध्यात्वा, ध्यानान्ते देवतोत्तरवेद्यां आदित्यादिनवग्रहानावाह्य, संपूज्य, देवदानवसंवादे० इति वरुणप्रार्थनान्तं कृत्वा, स्थंडिलसमीपमेत्य, समिद्द्वयेत्यन्वादध्यात् । चक्षुष्यन्तं उक्त्वा ग्रहानन्वादध्यात् । अत्र ग्रहहोमे चत्वारि द्रव्याणि । **अत्र प्रधानदेवतां 'इन्द्रकौशिकं तन्मंत्रेण समिध्-आज्य-चरु-पायस-द्रव्यैः चतुर्भिः प्रतिद्रव्यं (अष्टोत्तरसहस्र) / अष्टोत्तर-शतसंख्याकाभिराहुतिभिर्वा, मृत्युंजयं त्र्यंबकं त्र्यंबकेतिमंत्रेण घृताक्ततिलद्रव्येण सहस्रसंख्याकाहुतिभिः, नक्षत्रदेवतां नाममंत्रेण अष्टाविंशति-अष्टसंख्याकाभिर्वाज्यद्रव्येण सहस्राक्षादि-परिवारदेवताः घृताक्ततिलद्रव्यैः अष्टाष्टसंख्याभिः यक्ष्ये** । शेषेण स्विष्टकृत-

मिति चक्षुष्यन्तं कर्म कृत्वा यजमानेन द्रव्यत्यागे कृते, ग्रहहोमं प्रधानादिहोमं विधाय, **स्विष्टकृतात् प्राक् विविधसूक्तपाठजपः कार्यः** । तानि च सूक्तानि– श्रीसूक्तं, रुद्राध्यायं, आयुष्यमंत्रान्-जपेत् । ते च ऋक्द्वयं एष वां देवा, परावतो सप्तदशर्चं, आ नो भद्रा दशर्चं, इति वा इति आयुष्यमिति च सूक्तं पठेत् । ततः वेदपारायणं कार्यम् । तदसंभवे पुरुषसूक्तं अग्निमीळे इति नवर्चं सूक्तं च पठेत् । ततः स्विष्टकृतादि प्रायश्चित्त-होमान्ते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावादिहोमशेषं समाप्य, स्थापितकलशोदकैः सकुटुंबं बंधुवर्गयुतं यजमानं अभिषिंचेत् । तत्र अभिषेकमंत्राः– समुद्रज्येष्ठा० शं न इंद्राग्नी० परं मृत्यो० एष वां देवा ऋग्द्वयं० परावतो सप्तदशर्चं, स्वादिष्टयेति दशर्चं, अक्षिभ्यां षड्भिः, यज्जाग्रत इति षण्णाम् । ग्रहमंत्र-मुख्यदेवतामंत्रेत्यादीनां सर्वेषां अभिषेके विनियोगः ।

(अभिषेकमंत्राणां बाहुल्यात् यथावकाशं यथाशक्ति पाठः ।)

ततो यजमानः अभिषेकवस्त्रं परित्यज्य, धृतशुक्लांबरः, अभिषेकवस्त्रं आचार्याय दद्यात् । विभूतिं धृत्वा आ नो भद्रा इति महाशांतिजपपूर्वकं देवतोत्तरपूजने कृते, मार्कण्डेयादीन् प्रार्थयेत । ततः आयुर्वृद्ध्यै सतिलगुडसंमिश्रं दुग्धं प्राशयेत् । तत्र मंत्रः **'सतिलं गुडसंमिश्रं अंजल्यर्धमितं पयः । मार्कंडेयात् वरं लब्ध्वा पिबाम्यायुर्विवृद्धये ।'** इति पिबेत् । ततः कांस्यपात्रे घृतमासिच्य, तत्र **'रूपं रूपं'** इति मंत्रेण आज्यावलोकनं कृत्वा, तत्पात्रं सदक्षिणाकं ब्राह्मणाय दत्त्वा, गो-भू-तिल-हिरण्यादि दशदानानि, कानिचित् प्रत्यक्षाणि, कानिचित् निष्क्रयद्वारा, सर्वाणि वा निष्क्रयरूपेण ब्राह्मणेभ्यो दत्त्वा, तथा शतगुंजापरिमितं सुवर्णं, तन्निष्क्रयं वा विभज्य विभज्य ब्राह्मणेभ्यो दत्त्वा, अशक्तौ शतसर्षपतुलितं वा ततः विसर्जितदेवतापीठदानान्ते तिलदानं च कृत्वा, तत्र मंत्रः 'तिलाः कश्यपसंभूतास्तिलाः पापहराः शुभाः । तिलपात्रप्रदानेन अतः शान्तिं प्रयच्छ मे ॥' इति । पुत्रादिकैः पुष्पमालावस्त्रादिना यजमानं (अहेर) सत्कृत्य पुरंध्रीभिः (सुवासिनीभिः) आचारात् यजमानस्य यावन्ति वयोवर्षाणि तावद्भिर्वा नीराजनैः (दीपैः) नीराजयित्वा, ब्राह्मणेभ्यो दक्षिणां दत्त्वा, तेभ्यः आशीर्वचनं गृहीत्वा, ब्राह्मणभोजनसंकल्पं कृत्वा, देवानभिवाद्य, कर्म परमेश्वरार्पणं कुर्यात् । द्विराचम्य, त्रिवारं विष्णुस्मरणं कुर्यात् इति ।

॥ इति प्राचीनग्रंथानुसारं नारायणशास्त्री जोशी–विरचिता
॥ ऐन्द्री–शान्तिः समाप्ता ॥

॥ श्रीकृष्णार्पणमस्तु ॥

सहस्रचन्द्रदर्शन–शान्तिः ।

सहस्रचन्द्रदर्शन-शान्तौ सहस्रचन्द्रदर्शन–विचारः ।

शौनकः–अशीतिवर्षे संप्राप्ते जननान्मरणं ध्रुवम् ।
सहस्रेन्दोर्दर्शनं च जायते वै तदा ध्रुवम् ॥ १ ॥

अस्यार्थ :–जननात् एकोनाशीतिवर्ष(७९)समाप्तौ **अशीति**–(८०)–वर्षारंभे सहस्रचन्द्रदर्शनानि भवन्ति, तदनिष्टम् मरणसदृशं अनिष्टफलदं, तद्दोषपरिहारार्थं शान्तिर्विधेया । इति वचसोऽर्थः ।

आदौ-अत्रोक्तसहस्रचन्द्रदर्शनस्य सहस्रसंख्यापरिपूर्तिप्रकारः प्रदर्श्यते । प्रतिमासं अमावास्यायां सूर्येण सह स्थितस्य नाम लुप्तस्य चन्द्रस्य द्वितीयमासारंभे प्रतिपदि कदाचित् द्वितीयायां चन्द्रदर्शनं भवति । एवं प्रतिवर्षं द्वादश चन्द्रदर्शनानि, एकोनाशीति–वर्ष–समाप्तौ संगुण्य अष्टचत्वारिंशदधिकनवशतानि चन्द्रदर्शनानि (९४८) ततश्च सौरवर्षस्य चान्द्रसंवत्सरस्य समन्वयार्थं पूर्वाचार्यैः मध्ये–

द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा अधिकमासः प्रकल्पितः । ते च प्रायः अष्टाविंशतिर्भवन्ति । तांश्च मिलित्वा षट्सप्तत्यधिकनवशतानि (९४८+२८= ९७६) चन्द्रदर्शनानि संपन्नानि । तथा खग्रासचन्द्रग्रहणे चन्द्रग्रहणमध्यकालः अमावास्यया सदृशः चन्द्रस्य पूर्णतया लुप्तत्वात् पुनर्दर्शनं शुक्लप्रतिपद्-चन्द्रदर्शन-सदृशम् लोपानंतरं जायमानत्वात् । तानि खग्रासचन्द्रग्रहणानि । एकोनाशीति-वर्षपर्यंतं चतुर्विंशति (कदाचित् अधिकान्यपि) भवन्त्येव, तानि मिलित्वा-अशीति-वर्षारंभे सहस्रचन्द्रदर्शनानि-(९७६+२४=१०००) संपन्नानि । एतदभिप्रायेणैव शौनकेनोक्तम् अशीतिवर्षारंभे सहस्रचन्द्रदर्शनशान्तिर्विधेया इति युक्तं सप्रमाणं निराबाधं च । नात्र संदेहावसरः । अस्य विषयस्य प्रत्ययार्थे अस्माभिः शालिवाहन १८२१ शकादारभ्य १९०० शकपर्यंतं पंचांगस्थानि खग्रासचन्द्रग्रहणानि परिगणितानि तानि च त्रिंशत्-(३०)-अधिकानि भवन्ति, इति कृत्वा–

अस्योऽपि शौनकोक्तवचसि नाक्षेपावसरः । एवं स्थिते ये केचन अदूरदर्शिनः, अशीतिवर्षारंभे चन्द्रदर्शनस्य सहस्रसंख्यापूर्तिर्न भवतीतिकृत्वा एकाशीति-(८१) द्व्यशीति(८२)वर्षारंभे इयं शान्तिर्विधेयेति वदन्ति ते तु भ्रान्ता एव । अविचारित-रमणीयमेतत् इति त्याज्यमेव । शौनकोक्तवचसा अशीतिवर्षारंभे एव इयं शान्तिर्विधेया । श्रद्धया अनुष्ठेया, फलाय कल्पते । इति सर्वं सुस्थम् ।

यत्तु वैखानस-गृह्यसूत्रे :–तदेवं वर्तमानस्य यद्यष्टमासाधिकाशीतिवर्षाणि रवि-वर्षेणाधिगच्छेयुः स दृष्टसहस्रचन्द्रो भवति । तमेनं क्रियायुक्तं पुण्यकृत्तमं ब्रह्मशरीरमित्याचक्षते इति, तृतीयप्रश्ने एकविंशतिकण्डिकायां इति, एतत्तु तत्सूत्रा-नुसारिभिरनुष्ठेयम्, सौरवर्षमासगणनयोक्तम् ।

इति अशीतिवर्षारंभे चन्द्रदर्शनस्य सहस्रसंख्यापरिपूर्तिविचारः ।

—विद्याविनोद : **नारायणशास्त्री जोशी –आंजर्लेकरः**

अथ सहस्रचन्द्र–दर्शन–शान्तेः प्रयोगदर्शनम् ।

* * * * * * * * * * * * * * * * *

प्रधानदेवता : : सहस्रसंख्या-दर्शन-गुणवि० चन्द्रः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : नवो नवो भ० ।
हवनीयद्रव्यं : : आज्यम् ।
हवनसंख्या : : १००८ वा १०८ वा यथाशक्ति ।
अधिदेवता : : त्र्यंबकः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : त्र्यंबकं यजमाहे ।
हवनीयद्रव्यं : : आज्यम् ।
हवनसंख्या : : १०८ वा २८ वा यथाशक्ति ।
प्रत्यधिदेवता : : कालस्वरूपसूर्यः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : आ कृष्णेन ।
हवनीयद्रव्यं : : आज्यम् ।
हवनसंख्या : : २८ वा ८ वा यथाशक्ति ।
नक्षत्रदेवता : : यजमानस्य यद् जन्मनक्षत्रं तद् देवता ।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : नाममंत्रः ।
हवनीयद्रव्यं : : आज्यम् ।
हवनसंख्या : : २८ वा ८ वा यथाशक्ति ।

सर्वशान्तीनां संकल्पस्वरूपं एकमेव । केवलं वयःसंख्याभेदः । सर्वासु शान्तिषु हवनसमाप्तौ स्विष्टकृतात् पूर्वं विविधसूक्तानि यजमानाय श्रावयेत् । अनन्तरम् स्विष्टकृतादि-प्रायश्चित्तहोमान्ते बलिदानम्, पूर्णाहुतिं, संस्रावादिहोमशेषं समाप्य कलशोदकैः यजमानं अभिषिंचेत् । नूतनवस्त्रान्ते विभूतिं धृत्वा देवतां सप्तचिरंजीवांश्च प्रार्थयेत । देवतोत्तरपूजनम्, दुग्धप्राशनम्, आज्यावलोकनम्, पीठदानम्, दशदानम् शतगुंजासुवर्णदानम्, ब्राह्मणभोजनदक्षिणादानम् इत्यादीनां संकल्पः । यजमानं सत्कृत्य (अहेर) नीराजनविधिः, आशीर्वादः । त्रिवारं विष्णुस्मरणेन कर्मसमाप्तिं वाचयेत् इति । अयम् उत्तरांगविधिः सर्वत्र समानः ।

अथ सहस्रचन्द्र–दर्शन–शान्तिः ।

[अशीतितमे वर्षे (८०) प्राप्ते क्रियमाणा ।]

अथ कर्ता यजमानः जन्मनः सकाशात् **अशीतितमे वर्षे प्राप्ते**, जन्मदिने जन्मनक्षत्रे चन्द्रानुकूल्ये शुभेऽहनि वा कृताभ्यंगः कृतनित्यक्रियः, कृताग्निसिद्धिः शुभे सवस्त्रपीठासने उपविश्य, यज्ञोपवीती, आचम्य, पवित्रपाणिः, प्राणानायम्य पंचगव्यप्राशनादिना शरीरशुद्धिं विधाय, सुवासिन्या कृतमंगलतिलकः देवतागुर्वादींश्चाभिवाद्य, ब्राह्मणैर्दत्तानुज्ञः स्वासने उपविश्य, पुनः आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रः अमुकशर्माऽहं मम जन्मन, सकाशात् **अशीतितमे वर्षे प्राप्ते** सूचित–संभाव्यमान–नानाविधरोग–दृष्टिमान्द्य–छायावैकृत्य–भार्यापुत्रादिवियोग–धनधान्य–पशुक्षयादि–विविध–अरिष्ट–निरसनार्थं जन्मराशि–जन्मलग्नाभ्यां सकाशात् गोचरेण अनिष्टस्थानस्थित–आदित्यादि–नवग्रहाणां उत्पन्नोत्पत्स्यमानपीडानिरसनपूर्वकं सर्वसुखावाप्तिधनधान्याद्यभिवृद्ध्यर्थं समस्तमंगलप्राप्त्यर्थं देशकालाद्यनुसारतः विद्वदुपदिष्टेन विधिना यथाशक्तिसंभृत-संभारैः यथाज्ञानतः सग्रहमखां **सहस्रचन्द्र–दर्शन–शान्तिं करिष्ये** । तदंगं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यवरणं च करिष्ये । तत्रादौ निर्विघ्नता–सिद्ध्यर्थं महागणपतिपूजनं करिष्ये इति संकल्प्य, तानि कृत्वा, वृताचार्यः स्थंडिलसमीपमुपविश्य आचम्येत्यादि० श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रोत्पन्नेन अमुक-शर्मणा यजमानेन संकल्पित–**सहस्रचंद्र–दर्शन–शान्ति**–कर्मणि वृतोऽहं यथा-ज्ञानतः देशकालाद्यनुसारेण एभिर्ब्राह्मणैः सह आचार्यकर्म करिष्ये । तदंगं शरीरशुद्ध्यर्थं पुरुषसूक्त–जप–पूर्वकम् भू–शुद्ध्यादि करिष्ये । आदौ निर्विघ्नार्थं महागणपति–स्मरणं च करिष्ये । इत्यादि गौरसर्षपविकिरणादि प्रादेशान्तं कर्म कृत्वा, स्थण्डिलात् पूर्वभागे वेदीं प्रकल्प्य, (अत्र केचन–सर्वतोभद्रस्य (लिंगतोभद्रस्य वा) सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य, तत्र ब्रह्मादि-मंडल-देवताः आवाह्य, संपूज्य, तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां देवता-स्थापनमिच्छन्ति ।) सवस्त्रपीठासने तण्डुलराश्युपरि महीद्यौरित्यादिना कलशं प्रतिष्ठाप्य, वरुणप्रार्थनान्तं कृत्वा, पूर्णपात्रे अष्टदलमध्ये कर्णिकायां कृताग्न्युत्तारणपूर्विकायां सुवर्णप्रतिमायां **सहस्रसंख्याक–दर्शन–गुणविशिष्टं चन्द्रं, नवो नवो भवति० इति मंत्रेण आवाह्य, तद्दक्षिणपार्श्वे अधिदेवतां मृत्युंजयं–त्र्यंबकेति मंत्रेण आवाह्य, तद्वामपार्श्वे कालस्वरूपं सूर्यं आ कृष्णेनेति मंत्रेण स्थापयेत् । तद्यथा नवो नवो भवतीति मन्त्रस्य सूर्या सावित्री चन्द्रस्त्रिष्टुप् । सहस्र-संख्याकदर्शनगुणविशिष्ट-चन्द्रावाहने विनियोगः ।**

ॐ नवो॑ नवो भवति॒ जाय॑मानो
ऽह्नां॑ के॒तुरु॒षसा॑मे॒त्यग्र॑म् ।
भा॒गं दे॒वेभ्यो॒ वि द॑धात्या॒यन्
प्र चं॒द्रमा॑स्तिरते दी॒र्घमायुः॑ ।

(अ–८, अ–३, वर्ग–२३)

अस्यां सुवर्णमय्यां मूर्तौ प्रधानदेवतां सहस्रसंख्याकदर्शनगुणविशिष्टचंद्राय नमः। सहस्रसंख्याकदर्शनगुणविशिष्टचंद्रं सांगं सपरिवारं सायुधं सशक्तिकं आवाहयामि। ॐ भूः सहस्रसंख्याक० चंद्रं आवा०। ॐ भुवः सहस्रसंख्याक० चंद्रं आवा०। ॐ स्वः सहस्रसंख्याक० चंद्रं आवा०। ॐ भूर्भुवःस्वः सहस्रसंख्याक० चंद्रं आवा०। तद्दक्षिणतः **अधिदेवतां मृत्युंजयं त्र्यंबकेति मंत्रेण आवाह्य। त्र्यंबकं मैत्रावरुणिर्वसिष्ठस्त्र्यंबको मृत्युंजयस्त्रिष्टुप्। त्र्यंबक मृत्युंजयावाहने विनियोगः।**

ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् ।
उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मुक्षीय॒ माऽमृता॑त् ॥

(अ–५, अ–४, वर्ग–३०)

अस्यां सुवर्णमय्यां मूर्तौ (पूगीफले वा) ॐ भूर्भुवःस्वः त्र्यंबकाय मृत्युंजयाय नमः। त्र्यंबकं मृत्युंजयं आवाहयामि। भूरित्यादि आवाह्य। वामपार्श्वे प्रत्यधिदेवतां कालस्वरूपसूर्यं आ कृष्णेनेति मंत्रेणावाह्य। आ कृष्णेनांगिरसवसिष्ठःकालस्वरूपः सूर्यः पुर उष्णिक्-कालस्वरूपसूर्यावाहने विनियोगः।

ॐ आ कृ॒ष्णेन॒ रज॑सा॒ वर्त॑मानो
नि॒वे॒शय॑न्न॒मृतं॒ मर्त्यं॑ च ।
हि॒र॒ण्यये॑न सवि॒ता रथे॒ना
आ दे॒वो या॑ति॒ भुव॑नानि॒ पश्य॑न् ॥

(अ–१, अ–३, वर्ग–६)

अस्यां सुवर्णमय्यां मूर्तौ (पूगीफले वा) कालस्वरूप–सूर्याय नमः। कालस्वरूपं सूर्यं आवाहयामि। भूः इत्यादि आवाह्य। तदुत्तरतः **नक्षत्रदेवतां** नाममंत्रेणावाह्य, काण्डानुसमयेन पदार्थानुसमयेन वा सर्वान् संपूज्य, प्रधानदेवतासमीपे तन्मंत्रं (नवो नवो भवति) अष्टोत्तरशतं अष्टाविंशतिवारं वा जप्त्वा, स्थंडिलान्तिकमेत्य, अद्येत्यादि० संकल्पित–**सहस्रचंद्रदर्शन**–शांतिकर्मणि स्थंडिलादि–सकलं कर्म करिष्ये। वरदनामानमग्निं प्रतिष्ठाप्य, ध्यात्वा, ध्यानान्ते देवतोत्तरवेद्यां आदित्यादि-नवग्रहानावाह्य, संपूज्य, देवदानवसंवादे० इति वरुणप्रार्थनान्तं कृत्वा, स्थंडिल-समीपमेत्य समिद्द्वयेत्यन्वादध्यात्। चक्षुष्यन्तं उक्त्वा ग्रहानन्वादध्यात्। **अत्र प्रधानं देवं सहस्रसंख्याकदर्शनगुणविशिष्टचंद्रं नवो नवो भवति इति मंत्रेण अष्टोत्तरसहस्र (१००८) संख्याकाहुतिभिः** आज्याहुतिभिः, अशक्तौ **अष्टोत्तर-शताहुतिभिर्वा (२०८) अधिदेवताप्रत्यधिदेवते च तैरेव द्रव्यैः अष्टोत्तर-शतसंख्याकाभिः, अष्टाविंशतिसंख्याभिर्वा, नक्षत्रदेवतां नाममंत्रेण अष्टा-विंशति–अष्टसंख्याकाभिर्वाज्यद्रव्येण यक्ष्ये।** शेषेण स्विष्टकृतमिति चक्षुष्यन्तं कर्म कृत्वा यजमानेन द्रव्यत्यागे कृते, ग्रहहोमं प्रधानादिहोमं विधाय **स्विष्टकृतात् प्राक् विविधसूक्तपाठजपः कार्यः।** तानि च सूक्तानि–श्रीसूक्तं, रुद्राध्यायं आयुष्य-मंत्रान् जपेत्। ते च ऋक्-द्वयं एष वां देवा परावतो सप्तदशर्चं, आ नो भद्रा दशर्चं, इति वा इति, आयुष्यमिति च सूक्तं पठेत्। ततः वेदपारायणं कार्यं तदसंभवे पुरुषसूक्तं अग्निमीळे इति नवर्चं सूक्तं च पठेत्। ततः स्विष्टकृतादि प्रायश्चित्तहोमान्ते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावादिहोमशेषं समाप्य,

अथ रौद्री शान्तिः ।

[**पञ्चाशीतितमे वर्षे (८५) प्राप्ते क्रियमाणा ।**]

अथ कर्ता यजमानः जन्मनः सकाशात् **पञ्चाशीति तमेवर्षे प्राप्ते,** जन्मदिने, जन्मनक्षत्रे, चंद्रानुकूल्ये शुभेऽहनि वा कृताभ्यंगः, कृतनित्यक्रियः, कृताग्निसिद्धिः, शुभे सवस्त्रपीठासने उपविश्य, यज्ञोपवीती, आचम्य, पवित्रपाणिः, प्राणानायम्य, पंचगव्य-प्राशनादिना शरीरशुद्धिं विधाय, सुवासिन्या कृतमंगलतिलकः, देवतागुर्वादींश्चाभिवाद्य, ब्राह्मणैर्दत्तानुज्ञः स्वासने उपविश्य, पुनः आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य, श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रः अमुकशर्माऽहं मम जन्मनः सकाशात् **पञ्चाशीतितमे वर्षे** प्राप्ते सूचित–संभाव्यमान–नानाविधरोग–दृष्टिमान्द्य–छायावैकृत्य–भार्यापुत्रादिवियोग–धनधान्यपशुक्षयादि–अरिष्ट–निरसनार्थं जन्मराशिजन्मलग्नाभ्यां सकाशात् गोचरेण अनिष्टस्थानस्थित–आदित्यादि–नवग्रहाणां उत्पन्नोत्पत्स्यमान-पीडापरिहारपूर्वकं सर्वसुखावाप्तिधनधान्याद्यभिवृद्ध्यर्थं समस्तमंगलप्राप्त्यर्थं देशकालाद्यनुसारतः विद्वदुपदिष्टेन विधिना यथा–संभृत-संभारैः यथाशक्ति यथाज्ञानतः सग्रहमखां **शौनकोक्तां रौद्री शान्तिं करिष्ये ।** तदंगं स्वस्ति-पुण्याहवाचनं, मातृकापूजनं, नांदीश्राद्धं, आचार्यवरणं च करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं च करिष्ये, इति संकल्प्य, तानि कृत्वा, वृताचार्यः, स्थंडिलसमीपमुपविश्य, आचम्येत्यादि० श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रोत्पन्नेन अमुकशर्मणा यजमानेन संकल्पित–**रौद्रीशान्ति**–कर्मणि वृतोऽहं यथाज्ञानतः देशकालाद्यनुसारेण एभिर्ब्राह्मणैः सह आचार्यकर्म करिष्ये। तदंगं शरीरशुद्ध्यर्थं पुरुषसूक्त–जप–पूर्वकम् भू–शुद्ध्यादि करिष्ये । आदौ निर्विघ्नार्थं महागणपति–स्मरणं च करिष्ये । इत्यादि गौरसर्षपविकिरणादि प्रादेशान्तं कर्म कृत्वा, स्थण्डिलात् पूर्वभागे वेदीं प्रकल्प्य, (अत्र केचन सर्वतोभद्रस्य (लिंगतोभद्रस्य वा) सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य, तत्र ब्रह्मादि-मंडल-देवताः आवाह्य, संपूज्य तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां देवतास्थापनमिच्छन्ति ।) सवस्त्रपीठासने तण्डुलराश्युपरि महीद्यौरित्यादिना कलशं प्रतिष्ठाप्य, वरुणप्रार्थनान्तं कृत्वा, पूर्णपात्रे अष्टदलमध्ये कर्णिकायां कृताग्न्युत्तारणपूर्विकायां सुवर्णप्रतिमायां–**मृत्युंजयं रुद्रदेवतां मानस्तोकेति मंत्रेण मृत्युंजयं रुद्रं प्रधानदेवं आवाहयेत् । तद्यथा–मानस्तोकेति कुत्सो मृत्युंजय-रुद्रो जगती मृत्युंजयरुद्रावाहने विनियोगः ।**

ॐ मा नस्तोके तनये मा नऽआयौ
मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधी–
र्हविष्मन्तः सदमित्त्वा हवामहे ।

(अ-१, अ-८, वर्ग-६)

(यजमानः तैत्तिरीयशाखीयश्चेत् तत्स्थो मंत्रो वा ग्राह्यः ।)

अस्यां सुवर्णमय्यां मूर्तौ प्रधानदेवतां मृत्युंजयं रुद्रं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि । ॐ भूः मृत्युंजयं रुद्रं आवा० । ॐ भुवः मृत्युंजयं रुद्रं आवा० । ॐ स्वः मृत्युंजयं रुद्रं आवा० । ॐ भूर्भुवः स्वः मृत्युंजयं रुद्रं आवा० । तदुत्तरतः त्र्यंबकेति मंत्रेण **त्र्यंबकं** आवाह्य, तदुत्तरतः **नक्षत्रदेवतां** नाममंत्रेणावाह्य, काण्डानुसमयेन पदार्थानुसमयेन वा सर्वान् संपूज्य, प्रधानदेवतासमीपे तन्मंत्रं अष्टोत्तरशतं अष्टाविंशतिवारं वा जप्त्वा, स्थण्डिलान्तिकमेत्य, अद्येत्यादि० संकल्पित-रौद्री-शांतिकर्मणि स्थंडिलादिसकलं कर्म करिष्ये । वरदनामानमग्निं प्रतिष्ठाप्य, ध्यात्वा, ध्यानान्ते देवतोत्तरवेद्यां आदित्यादिनवग्रहानावाह्य, संपूज्य, देवदानवसंवादे० इति वरुणप्रार्थनान्तं कृत्वा, स्थंडिलसमीपमेत्य, समिद्द्वयेत्यन्वादध्यात् । चक्षुष्यन्तं उक्त्वा ग्रहानन्वादध्यात् । **अत्र प्रधानदेवतां मृत्युंजयं रुद्रं तन्मंत्रेण समिध्-आज्य-चरु-पायस-द्रव्यैः चतुर्भिः प्रतिद्रव्यं (अष्टोत्तरसहस्र) अष्टोत्तर-शत-संख्याकाभिराहुतिभिर्वा, मृत्युंजयं त्र्यंबकं त्र्यंबकेतिमंत्रेण घृताक्ततिलद्रव्येण सहस्रसंख्याकाहुतिभिः, नक्षत्र-देवतां नाममंत्रेण अष्टाविंशति-अष्टसंख्याकाभिराज्यद्रव्येण यक्ष्ये ।** शेषेण स्विष्टकृतमिति चक्षुष्यन्तं कर्म कृत्वा यजमानेन द्रव्यत्यागे कृते, ग्रहहोमं प्रधानादिहोमं विधाय, **स्विष्टकृतात्** प्राक् **विविधसूक्त-पाठजपः कार्यः ।** तानि च सूक्तानि–श्रीसूक्तं, रुद्राध्यायं, आयुष्य-मंत्रान् जपेत् । ते च ऋग्द्वयं एष वां देवा, परावतो सप्तदशर्चं, आ नो भद्रा दशर्चं, इति वा इति, आयुष्यमिति च सूक्तं पठेत् । ततः वेदपारायणं कार्यम् । तदसंभवे पुरुषसूक्तं अग्निमीळे इति **नवर्चं** सूक्तं च पठेत् । ततः स्विष्टकृतादि प्रायश्चित-होमान्ते बलिदानं पूर्णाहुतिं च कृत्वा संस्रावादिहोमशेषं समाप्य, स्थापितकलशोदकै सकुटुंबं बंधुवर्गयुतं यजमानं अभिषिंचेत् । तत्र अभिषेकमंत्राः–समुद्रज्येष्ठा० शं न इंद्राग्नी० परं मृत्यो०

एष वां देवा ऋग्द्वयं परावतो सप्तदशार्चं, स्वादिष्टयेति दशार्चं, अक्षिभ्यां षड्भिः, यज्जाग्रत इति षण्णाम्। ग्रहमंत्र-मुख्यदेवतामंत्रेत्यादीनां सर्वेषां अभिषेके विनियोगः।

(अभिषेकमंत्राणां बाहुल्यात् यथावकाशं यथाशक्ति पाठः।)

ततो यजमानः अभिषेकवस्त्रं परित्यज्य, धृतशुक्लांबरः, अभिषेकवस्त्रं आचार्याय दद्यात्। विभूतिं धृत्वा आ नो भद्रा इति महाशांतिजपपूर्वकं देवतोत्तरपूजने कृते, मार्कण्डेयादीन् प्रार्थयेत। ततः आयुर्वृद्ध्यै सतिलगुडसंमिश्रं दुग्धं प्राशयेत्। तत्र मंत्रः '**सतिलं गुडसंमिश्रं अंजल्यर्धमितं पयः। मार्कंडेयात् वरं लब्ध्वा पिबाम्यायुर्विवृद्धये**। इति पिबेत्। ततः कांस्यपात्रे घृतमासिच्य, तत्र '**रूपं रूपं**' इति मंत्रेण आज्यावलोकनं कृत्वा, तत्पात्रं सदक्षिणाकं ब्राह्मणाय दत्त्वा, गो-भू-तिल-हिरण्यादि दशदानानि, कानिचित् प्रत्यक्षाणि, कानिचित् निष्क्रयद्वारा, सर्वाणि वा निष्क्रयरूपेण ब्राह्मणेभ्यः दत्त्वा, तथा शतगुंजापरिमितं सुवर्णं, तन्निष्क्रयं वा विभज्य विभज्य ब्राह्मणेभ्यो दत्त्वा, अशक्तौ शतसर्षपतुलितं वा ततः विसर्जितदेवतापीठदानान्ते तिलदानं च कृत्वा, तत्र मंत्रः 'तिलाः कश्यपसंभूतास्तिलाः पापहराः शुभाः। तिलपात्रप्रदानेन अतः शान्तिं प्रयच्छ मे॥' इति। पुत्रादिकैः पुष्पमालावस्त्रादिना यजमानं (अहेर) सत्कृत्य पुरंध्रीभिः (सुवासिनीभिः) आचारात् यजमानस्य यावन्ति वयोवर्षाणि तावद्भिर्वा नीराजनैः (दीपैः) नीराजयित्वा, ब्राह्मणेभ्यः दक्षिणां दत्त्वा, तेभ्यः आशीर्वचनं गृहीत्वा, ब्राह्मणभोजनसंकल्पं कृत्वा, देवानभिवाद्य, कर्म परमेश्वरार्पणं कुर्यात्। द्विराचम्य, त्रिवारं विष्णुस्मरणं कुर्यात् इति।

॥ इति प्राचीनग्रंथानुसारं नारायणशास्त्री जोशी-विरचिता
रौद्री-शान्तिः समाप्ता ॥

॥ श्रीकृष्णार्पणमस्तु ॥

अथ कालस्वरूप-सौरी-शान्तेः प्रयोगदर्शनम्।

* * * * * * * * * * * * * * * * *

प्रधानदेवता :	: कालस्वरूपसूर्यः।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: तच्चक्षुर्देवहितम्।
हवनीयद्रव्यं :	: समिद्-आज्य-चरु-पायसानि।
हवनसंख्या :	: १००८ वा १०८ वा यथाशक्ति।
उपदेवता :	: मृत्युंजयत्र्यंबकः।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: त्र्यंबकं यजामहे।
हवनीयद्रव्यं :	: घृताक्ततिलाः।
हवनसंख्या :	: १००८ वा १०८ वा यथाशक्ति।
नक्षत्रदेवता :	: यजमानस्य जन्मनक्षत्रं तद् देवता।
प्रतिष्ठा-पूजन-हवन-मंत्रः :	: नाममंत्रः।
हवनीयद्रव्यं :	: आज्यम्।
हवनसंख्या :	: २८ वा ८ वा यथाशक्ति।

सर्वशान्तीनां संकल्पस्वरूपं एकमेव। केवलं वयःसंख्याभेदः। सर्वासु शान्तिषु हवनसमाप्तौ स्विष्टकृतात् पूर्वं विविधसूक्तानि यजमानाय श्रावयेत्। अनन्तरम् स्विष्टकृतादि-प्रायश्चित्तहोमान्ते बलिदानम् पूर्णाहुतिं संस्रावादिहोमशेषं समाप्य कलशोदकैः यजमानं अभिषिंचेत्। नूतनवस्त्रान्ते विभूतिं धृत्वा देवतां सप्तचिरंजीवांश्च प्रार्थयेत। देवतोत्तरपूजनम्, दुग्धप्राशनम्, आज्यावलोकनम्, पीठदानम्, दशदानम्, शतगुंजासुवर्णदानम्, ब्राह्मणभोजनदक्षिणादानम् इत्यादीनां संकल्पः। यजमानं सत्कृत्य (अहेर) नीराजनविधिः, आशीर्वादः। त्रिवारं विष्णुस्मरणेन कर्मसमाप्तिं वाचयेत् इति। अयम् उत्तरांगविधिः सर्वत्र समानः।

अथ कालस्वरूप–सौरी शान्तिः ।

[नवतितमे वर्षे (९०) प्राप्ते क्रियमाणा ।]

अथ कर्ता यजमानः जन्मनः सकाशात् **नवतितमवर्षे प्राप्ते**, जन्मदिने, जन्मनक्षत्रे, चन्द्रानुकूल्ये शुभेऽहनि वा, कृताभ्यंगः, कृतनित्यक्रियः, कृताग्निसिद्धिः, शुभे सवस्त्रपीठासने उपविश्य, यज्ञोपवीती, आचम्य, पवित्रपाणिः प्राणानायम्य, पंचगव्यप्राशनादिना शरीरशुद्धिं विधाय, सुवासिन्या कृतमंगलतिलकः, देवतागुर्वादींश्चाभिवाद्य, ब्राह्मणैर्दत्तानुज्ञः स्वासने उपविश्य, पुनः आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य, श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रः अमुकशर्माऽहं मम जन्मनः सकाशात् **नवतितम**–वर्षे प्राप्ते सूचित–संभाव्यमान–नानाविधरोग–दृष्टिमान्द्य – छायावैकृत्य – भार्यापुत्रादिवियोग–धनधान्यपशुक्षयादि–अरिष्ट–निरसनार्थं जन्मराशिजन्मलग्नाभ्यां सकाशात् गोचरेण अनिष्टस्थानस्थित–आदित्यादि–नवग्रहाणां उत्पन्नोत्पत्स्यमान–पीडापरिहारपूर्वकं सर्वसुखावाप्तिधनधान्याद्यभिवृद्ध्यर्थं समस्तमंगलप्राप्त्यर्थं देशकालाद्यनुसारतः विद्वदुपदिष्टेन विधिना यथासंभृतसंभारैः यथाशक्ति यथाज्ञानतः सग्रहमखां **शौनकोक्तां कालस्वरूप-सौरीं शान्तिं करिष्ये** । तदंगं स्वस्ति-पुण्याहवाचनं, मातृकापूजनं, नांदीश्राद्धं आचार्य वरणं च करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं करिष्ये । इति संकल्प्य, तानि कृत्वा वृताचार्यः स्थंडिलसमीपमुपविश्य, आचम्येत्यादि० श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रोत्पन्नेन अमुकशर्मणा यजमानेन संकल्पित-**कालस्वरूप-सौरी शान्तिकर्मणि** वृतोऽहं यथाज्ञानतः देशकालाद्यनुसारेण एभिर्ब्राह्मणैः सह आचार्यकर्म करिष्ये । तदंगं शरीरशुद्ध्यर्थं पुरुषसूक्त–जप–पूर्वकम् भू–शुद्ध्यादि करिष्ये, आदौ निर्विघ्नार्थं महागणपति–स्मरणं च करिष्ये इत्यादि । गौरसर्षपविकिरणादि प्रादेशान्तं कर्म कृत्वा, स्थण्डिलात् पूर्वभागे वेदीं प्रकल्प्य, (अत्र केचन सर्वतोभद्रस्य (लिंगतोभद्रस्य वा) सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य, तत्र ब्रह्मादि–मंडल–देवताः आवाह्य, संपूज्य, तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां देवतास्थापनमिच्छन्ति ।) महीद्यौरित्यादिना कलशं संस्थाप्य, पूर्णपात्रे, अष्टदले कर्णिकायां कृताग्न्युत्तारणपूर्विकायां सुवर्णप्रतिमायां तच्चक्षुर्देवहितं मंत्रेण कालस्वरूपं सूर्यं प्रतिष्ठाप्य, तद्यथा–**तच्चक्षुरित्यस्य मैत्रावरुणिर्वसिष्ठः कालस्वरूपः सूर्यः पुर उष्णिक् कालस्वरूपसूर्यावाहने विनियोगः ।**

ॐ तच्चक्षुर्देवहितं शुक्रमुच्चरत् ।
पश्येम शरदः शतं
जीवेम शरदः शतम् ॥
(अ–५, अ–५, वर्ग–११)

अस्यां सुवर्णमय्यां मूर्तौ प्रधानदेवतां कालस्वरूपसूर्यं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि । ॐ भूः कालस्वरूपसूर्यं आवा० । ॐ भुवः कालस्वरूपसूर्यं आवा० । ॐ स्वः कालस्वरूपसूर्यं आवा० । ॐ भूर्भुवः स्वः कालस्वरूपसूर्यं आवा० । तदुत्तरतः त्र्यंबकेति मंत्रेण **त्र्यंबकं** आवाह्य, तदुत्तरतः **नक्षत्रदेवतां** नाममंत्रेणावाह्य, काण्डानुसमयेन पदार्थानुसमयेन वा सर्वान् संपूज्य, अभिषेकसमये सौरसूक्तमंत्रान् पठेत् । प्रधानदेवतासमीपे तन्मंत्रं (तच्चक्षुर्देवहितं०) अष्टोत्तरशतं अष्टाविंशतिवारं वा जप्त्वा, स्थंडिलान्तिकमेत्य, अद्येत्यादि० संकल्पित-कालस्वरूप–सौरी–शान्तिकर्मणि स्थंडिलादिसकलं कर्म करिष्ये । वरदनामानमग्निं प्रतिष्ठाप्य, ध्यात्वा, ध्यानान्ते देवतोत्तरवेद्यां आदित्यादिनवग्रहानावाह्य, संपूज्य, देवदानवसंवादे० इति वरुणप्रार्थनान्तं कृत्वा स्थंडिलसमीपमेत्य समिद्द्वयेत्यन्वादध्यात् । चक्षुष्यन्तं उक्त्वा ग्रहानन्वादध्यात् । **अत्र प्रधानं देवं कालस्वरूपं सूर्यं, तच्चक्षुरिति–मंत्रेण समिध्–आज्य–चरु–पायस–द्रव्यैः चतुर्भिः प्रतिद्रव्यं अष्टोत्तरसहस्र अष्टोत्तरशतसंख्याकाभिराहुतिभिर्वा, मृत्युंजय–त्र्यंबकं घृताक्ततिलद्रव्येण सहस्रसंख्याकाहुतिभिः नक्षत्रदेवतां नाममंत्रेण अष्टाविंशति–अष्टसंख्याकाभिर्वाज्यद्रव्येण यक्ष्ये** । शेषेण स्विष्टकृतमिति चक्षुष्यन्तं कर्म कृत्वा यजमानेन द्रव्यत्यागे कृते, ग्रहहोमं प्रधानादिहोमं विधाय **स्विष्टकृतात्** प्राक् **विविधसूक्तपाठजपः कार्यः**। तानि च सूक्तानि, श्रीसूक्तं, रुद्राध्यायं, आयुष्यमंत्रान् जपेत् । ते च ऋक्द्वयं एष वां देवा परावतो सप्तदशर्चं, आ नो भद्रा दशर्चं, इति वा इति आयुष्यमिति च सूक्तं पठेत् । ततः जप्त्वा वेदपारायणं कार्यम् । तदसंभवे पुरुषसूक्तं अग्निमीळे इति नवर्चं सूक्तं च पठेत् । ततः स्विष्टकृतादि–प्रायश्चित्तहोमान्ते बलिदानं पूर्णाहुतिं च कृत्वा, संस्रावादिहोमशेषं समाप्य, स्थापित-कलशोदकैः सकुटुंबं बंधुवर्गयुतं यजमानं अभिषिंचेत् । तत्र अभिषेकमंत्राः–

समुद्रज्येष्ठा० शं न इंद्राग्नी० परं मृत्यो० एष वां देवा ऋग्द्वयं० परावतो सप्तदशर्चं, स्वादिष्टयेति दशर्चं, अक्षिभ्यां षट्भिः, यज्जाग्रत इति षण्णाम् । ग्रहमंत्रमुख्यदेवता-मंत्रेत्यादीनां सर्वेषां अभिषेके विनियोगः ।

(अभिषेकमंत्राणां बाहुल्यात् यथावकाशं यथाशक्ति पाठः ।)

ततो यजमानः अभिषेकवस्त्रं परित्यज्य, धृतशुक्लांबरः, अभिषेकवस्त्रं आचार्याय दद्यात् । विभूतिं धृत्वा आ नो भद्रा इति महाशांतिजपपूर्वकं देवतोत्तरपूजने कृते, मार्कंडेयादीन् प्रार्थयेत । ततः आयुर्वृद्ध्यै सतिलगुडसंमिश्रं दुग्धं प्राशयेत् । तत्र मंत्रः '**सतिलं गुडसंमिश्रं अंजल्यर्धमितं पयः । मार्कंडेयात् वरं लब्ध्वा पिबाम्यायुर्विवृद्धये** । इति पिबेत् । ततः कांस्यपात्रे घृतमासिच्य, तत्र '**रूपं रूपं**' इति मंत्रेण आज्यावलोकनं कृत्वा, तत्पात्रं सदक्षिणाकं ब्राह्मणाय दत्त्वा, गो-भू-तिल-हिरण्यादि दशदानानि कानिचित् प्रत्यक्षाणि, कानिचित् निष्क्रयद्वारा सर्वाणि वा निष्क्रयरूपेण ब्राह्मणेभ्यः दत्त्वा, तथा शतगुंजापरिमितं सुवर्णं, तन्निष्क्रयं वा विभज्य विभज्य ब्राह्मणेभ्यो दत्त्वा, अशक्तौ शतसर्षपतुलितं वा ततः विसर्जितदेवतापीठदानान्ते तिलदानं च कृत्वा, तत्र मंत्रः 'तिलाः कश्यपसंभूतास्तिलाः पापहराः शुभाः । तिलपात्रप्रदानेन अतः शान्तिं प्रयच्छ मे ॥' इति । पुत्रादिकैः पुष्पमालावस्त्रादिना यजमानं (अहेर) सत्कृत्य पुरंध्रीभिः (सुवासिनीभिः) आचारात् यजमानस्य यावन्ति वयोवर्षाणि तावद्भिर्वा नीराजनैः (दीपैः) नीराजयित्वा, ब्राह्मणेभ्यः दक्षिणां दत्त्वा, तेभ्यः आशीर्वचनं गृहीत्वा, ब्राह्मणभोजनसंकल्पं कृत्वा, देवानभिवाद्य, कर्म परमेश्वरार्पणं कुर्यात् । द्विराचम्य, त्रिवारं विष्णुस्मरणं कुर्यात् इति ।

॥ इति प्राचीनग्रंथानुसारं नारायणशास्त्री जोशी–विरचिता कालस्वरूप–सौरी–शान्तिः समाप्ता ॥

॥ श्रीकृष्णार्पणमस्तु ॥

अथ त्रैयंबक–मृत्युंजय–शान्तेः प्रयोगदर्शनम् ।

* * * * * * * * * * * * * * * * *

प्रधानदेवता : : मृत्युंजयरुद्रः ।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : ॐ पूर्वकव्याहृति-संपुटितं त्र्यंबकं० ।
हवनीयद्रव्यं : : समिध्-आज्य-चरु-पायसानि ।
हवनसंख्या : : १००८ वा १०८ वा यथाशक्ति ।
नक्षत्रदेवता : : यजमानस्य जन्मनक्षत्रं तद् देवता ।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : नाममंत्रः ।
हवनीयद्रव्यं : : आज्यम् ।
हवनसंख्या : : २८ वा ८ वा यथाशक्ति ।

सर्वशान्तीनां संकल्पस्वरूपं एकमेव । केवलं वयःसंख्याभेदः । सर्वासु शान्तिषु हवनसमाप्तौ स्विष्टकृतात् पूर्वं विविधसूक्तानि यजमानाय श्रावयेत् । अनन्तरम् स्विष्ट-कृतादि-प्रायश्चित्तहोमान्ते बलिदानम्, पूर्णाहुतिं, संस्रावादिहोमशेषं समाप्य कलशो-दकैः यजमानं अभिषिंचेत् । नूतनवस्त्रान्ते विभूतिं धृत्वा देवतां सप्तचिरंजीवांश्च प्रार्थयेत । देवतोत्तरपूजनम्, दुग्धप्राशनम्, आज्यावलोकनम्, पीठदानम्, दश-दानम्, शतगुंजासुवर्णदानम्, ब्राह्मणभोजनदक्षिणादानम् इत्यादीनां संकल्पः । यजमानं सत्कृत्य (अहेर) नीराजनविधिः, आशीर्वादः । त्रिवारं विष्णुस्मरणेन कर्मसमाप्तिं वाचयेत् इति । अयम् उत्तरांगविधिः सर्वत्र समानः ।

अथ त्रैयंबक मृत्युंजय–शान्तिः

[पञ्चनवतितमे वर्षे (९५) प्राप्ते क्रियमाणा ।]

(अथ कर्ता यजमानः शक्तः इंद्रियादिबलसम्पन्नश्चेत् स्वयं, **नो चेत् पुत्राचार्यादिप्रतिनिधिद्वारा इयं शान्तिः कार्या। कर्ता पुत्रश्चेत्–'मम पितुः जन्मनः० कर्ता आचार्यश्चेत्–०अमुकगोत्रोत्पन्नस्य अमुकशर्मणः यजमानस्य जन्मनः०)।**

अथ कर्ता यजमानः जन्मनः सकाशात् **पञ्चनवतितमे वर्षे प्राप्ते**, जन्मदिने, जन्मनक्षत्रे चन्द्रानुकूल्ये शुभेऽहनि वा, कृताभ्यंगः, कृतनित्यक्रियः, कृताग्निसिद्धिः, शुभे सवस्त्रपीठासने उपविश्य, यज्ञोपवीती, आचम्य, पवित्रपाणिः, प्राणानायम्य, पंचगव्य-प्राशनादिना शरीरशुद्धिं विधाय, सुवासिन्या कृतमंगलतिलकः देवतागुर्वादींश्चाभिवाद्य, ब्राह्मणैर्दत्तानुज्ञः स्वासने उपविश्य, पुनः आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रः अमुकशर्माऽहं मम जन्मनः सकाशात् **पञ्चनवतितमे वर्षे प्राप्ते** सूचित–संभाव्यमान–नानाविधरोग–दृष्टिमान्द्य–छायावैकृत्य–भार्यापुत्रादि-वियोग–धनधान्य–पशुक्षयादि–त्रिविध–अरिष्ट–निरसनार्थं जन्मराशि–जन्मलग्नाभ्यां सकाशात् गोचरेण अनिष्टस्थानस्थित–आदित्यादि–नवग्रहाणां उत्पन्नोत्पत्स्यमान-पीडापरिहारपूर्वकं सर्वसुखावाप्तिधनधान्याद्यभिवृद्ध्यर्थं समस्तमंगलप्राप्त्यर्थं देशकालाद्य-नुसारतः विद्वदुपदिष्टेन विधिना यथाशक्तिसंभृतसंभारैः यथाज्ञानतः। (पुत्रश्चेत्) पितुराज्ञया (आचार्यश्चेत्) यजमानानुज्ञया सग्रहमखां **त्रैयंबक–मृत्युंजय–शान्तिं करिष्ये।** तदंगं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यवरणं च करिष्ये। तत्रादौ निर्विघ्नता–सिद्ध्यर्थं महागणपतिपूजनं करिष्ये इति संकल्प्य, तानि कृत्वा, वृताचार्यः स्थंडिलसमीपमुपविश्य, आचम्येत्यादि० श्रीपरमेश्वरप्रीत्यर्थं अमुक-गोत्रोत्पन्नेन अमुकशर्मणा यजमानेन संकल्पित–**त्रैयंबक–मृत्युंजय–शान्ति**-कर्मणि वृतोऽहं यथाज्ञानतः देशकालाद्यनुसारेण एभिर्ब्राह्मणैः सह आचार्यकर्म करिष्ये। तदंगं शरीरशुद्ध्यर्थं पुरुषसूक्त–जप–पूर्वकम् भू–शुद्ध्यादि करिष्ये। आदौ निर्विघ्नार्थं महागणपति–स्मरणं च करिष्ये। इत्यादि गौरसर्षपविकिरणादि प्रादेशान्तं कर्म कृत्वा, स्थण्डिलात् पूर्वभागे वेदीं प्रकल्प्य, (अत्र केचन–सर्वतोभद्रस्य (लिंगतो-भद्रस्य वा) सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य, तत्र ब्रह्मादि–मंडल–देवताः आवाह्य, संपूज्य, तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां

देवतास्थापनमिच्छन्ति।) सवस्त्रपीठासने तण्डुलराश्युपरि महीद्यौरित्यादिना कलशं प्रतिष्ठाप्य, वरुणप्रार्थनान्तं कृत्वा, पूर्णपात्रे अष्टदलमध्ये कर्णिकायां कृताग्न्युत्तारण-पूर्विकायां सुवर्णप्रतिमायां ॐ **भूर्भुवः स्वः—व्याहृति–संपुटित–त्रैयंबकमंत्रेण त्र्यंबक–मृत्युंजय–रुद्र–देवतामावाहयेत्। तद्यथा त्र्यंबको मैत्रावरुणिर्वसिष्ठो मृत्युंजयरुद्रस्त्रिष्टुप्। मृत्युंजयरुद्रावाहने विनियोगः। आवाहनमंत्रस्वरूपं तारव्याहृतिसंपुटितम्।**

ॐ भूर्भुवः स्वः
ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥

ॐ स्वः भुवः भूः ॐ (अ. ५, अ. ४, वर्ग–३०)

अस्यां सुवर्णमय्यां मूर्तौ प्रधानदेवतां मृत्युंजयाय रुद्राय नमः। मृत्युंजयं रुद्रं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि। ॐ भूः मृत्युंजयं रुद्रं आवा०। ॐ भुवः मृत्युंजयं रुद्रं आवा०। ॐ स्वः मृत्युंजयं रुद्रं आवा०। ॐ भूः भुवः स्वः मृत्युंजयं रुद्रं आवा०। उक्तरीत्या मंत्रपाठेन षोडशोपचारैः पूजां कुर्यात्। जपोऽप्येवम्। हवनसमये मन्त्रपाठः एवं–ॐ भूर्भुवः स्वः। ॐ त्र्यंबकं यजामहे.... मामृतात्। ॐ स्वः भुवः भूः ॐ स्वाहा। एवंरीत्या मंत्रपाठेन हवनम् कार्यम्। तदुत्तरतः **नक्षत्रदेवतां** नाममंत्रेणावाह्य, काण्डानुसमयेन पदार्थानुसमयेन वा सर्वान् व्याहृतिसंपुटित-त्र्यंबकमंत्रेण षोडशोपचारैः पूजयेत्। प्रधानदेवतासमीपे तन्मंत्रं (ॐ पूर्वकव्याहृतिसंपुटित त्र्यंबक०) अष्टोत्तरशतं अष्टाविंशतिवारं वा जप्त्वा, स्थंडिलान्तिकमेत्य, अद्येत्यादि० संकल्पित-मृत्युंजय-महारथीशांतिकर्मणि स्थंडिलादि-सकलं कर्म करिष्ये। वरदनामानमग्निं प्रतिष्ठाप्य, ध्यात्वा, ध्यानान्ते देवतोत्तरवेद्यां आदित्यादिनवग्रहानावाह्य, संपूज्य, देवदानवसंवादे० इति वरुणप्रार्थनान्तं कृत्वा स्थंडिलसमीपमेत्य समिद्द्वयेत्यन्वादध्यात्। चक्षुष्यन्तं उक्त्वा ग्रहानन्वादध्यात्। **अत्र प्रधानं देवं मृत्युंजयं रुद्रं, ॐ पूर्वक-व्याहृति-संपुटितं त्र्यंबकं०-मंत्रेण समिध्-आज्य-चरु-पायस-द्रव्यैः चतुर्भिः प्रतिद्रव्यं (अष्टोत्तरसहस्र) अष्टोत्तर-शतसंख्याकाभिराहुतिभिर्वा, नक्षत्रदेवतां नाममंत्रेण अष्टाविंशति–अष्ट-संख्याकाभिर्वाज्यद्रव्येण यक्ष्ये।** शेषेण स्विष्टकृतमिति चक्षुष्यन्तं कर्म कृत्वा

यजमानेन द्रव्यत्यागे कृते, ग्रहहोमं प्रधानादिहोमं विधाय **स्विष्टकृतात्** प्राक् **विविधसूक्तपाठजपः कार्यः।** तानि च सूक्तानि–श्रीसूक्तं, रुद्राध्यायं, आयुष्यमंत्रान् जपेत्। ते च ऋक्द्वयं एष वां देवा परावतो सप्तदशर्चं, आ नो भद्रा दशर्चं, इति वा इति आयुष्यमिति च सूक्तं पठेत्। ततः जप्त्वा वेदपारायणं कार्यम्; तदसंभवे पुरुषसूक्तं अग्निमीळे इति नवर्चं सूक्तं च पठेत्। ततः स्विष्टकृतादि-प्रायश्चितहोमान्ते बलिदानं पूर्णाहुतिं च कृत्वा, संस्रावादिहोमशेषं समाप्य, स्थापितकलशोदकैः सकुटुंबं बंधुवर्गयुतं यजमानं अभिषिंचेत्। तत्र अभिषेकमंत्राः–समुद्रज्येष्ठा० शं न इंद्राग्नी० परं मृत्यो० एष वां देवा इति ऋग्द्वयं० परावतो सप्तदशर्चं, स्वादिष्टयेति दशर्चं, अक्षिभ्यां षट्भिः, यज्जाग्रत इति षण्णाम्। ग्रहमंत्रमुख्यदेवतामंत्रेत्यादीनां सर्वेषां अभिषेके विनियोगः।

(अभिषेकमंत्राणां बाहुल्यात् यथावकाशं यथाशक्ति पाठः।)

ततो यजमानः अभिषेकवस्त्रं परित्यज्य, धृतशुक्लांबरः, अभिषेकवस्त्रं आचार्याय दद्यात्। विभूतिं धृत्वा आ नो भद्रा इति महाशांतिपूर्वकं देवतोत्तरपूजने कृते, मार्कंडेयादीन् प्रार्थयेत। ततः आयुर्वृद्ध्यै सतिलगुडसंमिश्रं दुग्धं प्राशयेत्। तत्र मंत्रः '**सतिलं गुडसंमिश्रं** अंजल्यर्धमित पयः। **मार्कंडेयात् वरं** लब्ध्वा **पिबाम्यायुर्विवृद्धये**।' इति पिबेत्। ततः कांस्यपात्रे घृतमासिच्य, तत्र '**रूपं-रूपं**' इति मंत्रेण आज्यावलोकनं कृत्वा तत्पात्रं सदक्षिणाकं ब्राह्मणाय दत्त्वा, गो–भू–तिल-हिरण्यादि दशदानानि कानिचित् प्रत्यक्षाणि, कानिचित् निष्क्रयद्वारा, सर्वाणि वा निष्क्रयरूपेण ब्राह्मणेभ्यः दत्त्वा, तथा शतगुंजापरिमितं सुवर्णं, तन्निष्क्रयं वा विभज्य ब्राह्मणेभ्यो दत्त्वा, अशक्तौ शतसर्षपतुलितं वा ततः विसर्जितदेवतापीठदानान्ते तिलदानं च कृत्वा, तत्र मंत्रः 'तिलाः कश्यपसंभूतास्तिलाः पापहराः शुभाः। तिलपात्र-प्रदानेन अतः शान्तिं प्रयच्छ मे॥' इति। पुत्रादिकैः पुष्पमालावस्त्रादिना यजमानं (अहेर) सत्कृत्य, पुरंध्रीभिः (सुवासिनीभिः) आचारात् यजमानस्य यावन्ति वयोवर्षाणि तावद्भिर्वा नीराजनैः (दीपैः) नीराजयित्वा, ब्राह्मणेभ्यः दक्षिणां दत्त्वा, तेभ्यः आशीर्वचनं गृहीत्वा, ब्राह्मणभोजनसंकल्पं कृत्वा, देवानभिवाद्य, कर्म परमेश्वरार्पणं कुर्यात्। द्विराचम्य त्रिवारं विष्णुस्मरणं कुर्यात् इति।

॥ इति प्राचीनग्रंथानुसारं नारायणशास्त्री जोशी–विरचिता
मृत्युंजय-रुद्र-शान्तिः समाप्ता।

॥ श्रीकृष्णार्पणमस्तु ॥

अथ महामृत्युंजय–शान्तेः प्रयोगदर्शनम्।

* * * * * * * * * * * * * * * *

प्रधानदेवता : : महामृत्युंजयः।
प्रतिष्ठा पूजन-हवन-मंत्रः : : तार त्रिबीजव्याहृतिसंपुटितत्र्यंबक०।
हवनीयद्रव्यं : : समिद्-आज्य-चरु-पायसानि।
हवनसंख्या : : १००८ वा १०८ वा यथाशक्ति।
परिवारदेवता : : विश्वेश्वरादि-एकादश-रुद्राः।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : नाममंत्रः।
हवनीयद्रव्यं : : पायसम्।
हवनसंख्या : : २८ वा ८ वा यथाशक्ति।
उपदेवता : : सूर्यः।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : उपजयेति०।
हवनीयद्रव्यं : : तिलम्।
हवनसंख्या : : २८ वा ८ वा यथाशक्ति।
नक्षत्रदेवता : : यजमानस्य जन्मनक्षत्रं तद् देवता।
प्रतिष्ठा-पूजन-हवन-मंत्रः : : नाममंत्रः।
हवनीयद्रव्यं : : आज्यम्।
हवनसंख्या : : २८ वा ८ वा यथाशक्ति।

सर्वशांतीनां संकल्पस्वरूपं एकमेव। केवलं जपःसंख्याभेदः। सर्वासु शान्तिषु हवनसमाप्तौ स्विष्टकृतात् पूर्वं विविधसूक्तानि यजमानाय श्रावयेत्। अनन्तरम् स्विष्टकृतादि–प्रायश्चित्तहोमान्ते बलिदानम् पूर्णाहुतिं संस्रावादिहोमशेषं समाप्य कलशोदकैः यजमानं अभिषिंचेत्। नूतनवस्त्रान्ते विभूतिं धृत्वा देवतां सप्तचिरंजीवांश्च प्रार्थयेत्। देवतोत्तरपूजनम्, दुग्धप्राशनम्, आज्यावलोकनम्, पीठदानम्, दशदानम्, शतगुंजासुवर्णदानम्, ब्राह्मणभोजनदक्षिणादानम् इत्यादीनां संकल्पः। यजमानं सत्कृत्य (अहेर) नीराजनविधिः, आशीर्वादः। त्रिवारं विष्णुस्मरणेन कर्मसमाप्तिं वाचयेत् इति। अयम् उत्तरांगविधिः सर्वत्र समानः।

अथ महामृत्युंजय–शान्तिः ।

[शततमे (१००)–वर्षे क्रियमाणा।]

(अथ कर्ता यजमानः शक्तः इंद्रियादिबलसम्पन्नश्चेत् स्वयं, नो चेत् पुत्राचार्यादि–प्रतिनिधिद्वारा इयं शान्तिः कार्या।)

अथ कर्ता यजमानः प्रतिनिधिद्वारा चेत्, मम पितुः जन्मनः सकाशात् **शततमे वर्षे प्राप्ते,** (कर्ता पुत्रादिश्चेत् पूर्ववत् ऊहः कार्यः।) जन्मदिने, जन्मनक्षत्रे, चन्द्रानुकूल्ये शुभेऽहनि वा, कृताभ्यंगः, कृतनित्यक्रियः, कृताग्निसिद्धिः, शुभे सवस्त्र पीठासने उपविश्य, यज्ञोपवीती, आचम्य, पवित्रपाणिः प्राणानायम्य, पंचगव्य-प्राशनादिना शरीरशुद्धिं विधाय, सुवासिन्या कृतमंगलतिलकः, देवतागुर्वादींश्चाभिवाद्य, ब्राह्मणैर्दत्तानुज्ञः स्वासने उपविश्य, पुनः आचम्य, प्राणानायम्य, देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं अमुकगोत्रः अमुकशर्माऽहं मम पितुः (प्रतिनिधिश्चेत्) जन्मनः सकाशात् **शततमे वर्षे प्राप्ते** सूचित-संभाव्यमान-नानाविधरोग-दृष्टिमान्द्य-छायावैकृत्य–भार्यापुत्रादिवियोग-धनधान्यपशुक्षयादि–अरिष्ट–निरसनार्थं जन्मराशि-जन्मलग्नाभ्यां सकाशात् गोचरेण अनिष्टस्थानस्थित—आदित्यादि—नवग्रहाणां उत्पन्नोत्पत्स्यमान—पीडापरिहारपूर्वकं सर्वसुखावाप्तिधनधान्याद्यभिवृद्ध्यर्थं समस्त-मंगलप्राप्त्यर्थं देशकालाद्यनुसारतः विद्वदुपदिष्टेन विधिना (कर्ता पुत्रश्चेत् पितुराज्ञया, आचार्यश्चेत् अमुकगोत्रोत्पन्नस्य अमुकशर्मणः यजमानस्य आज्ञया संकल्पोक्त-फलप्राप्तये) यथासंभृतसंभारैः यथाशक्ति यथाज्ञानतः सग्रहमखां **शौनकोक्तां महामृत्युंजयशान्तिं करिष्ये ।** तदंगं स्वस्ति-पुण्याहवाचनं, मातृकापूजनं, नांदीश्राद्धं आचार्यवरणं च करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं महागणपतिपूजनं करिष्ये । इति संकल्प्य, तानि कृत्वा वृताचार्यः स्थंडिलसमीपमुपविश्य, आचम्येत्यादि॰ श्रीपरमेश्वर-प्रीत्यर्थं अमुकगोत्रोत्पन्नेन अमुकशर्मणा यजमानेन संकल्पित–**महामृत्युंजय-शान्तिकर्मणि** वृतोऽहं यथाज्ञानतः देशकालाद्यनुसारेण एभिर्ब्राह्मणैः सह आचार्यकर्म करिष्ये । तदंगं शरीरशुद्ध्यर्थं पुरुषसूक्त–जप–पूर्वकम् भू–शुद्ध्यादि करिष्ये, आदौ निर्विघ्नार्थं महागणपति–स्मरणं च करिष्ये इत्यादि । गौरसर्षप-विकिरणादि प्रादेशान्तं कर्म कृत्वा, स्थण्डिलात् पूर्वभागे वेदीं प्रकल्प्य, (अत्र केचन सर्वतोभद्रस्य लिंगतोभद्रस्य वा सर्वसाधारणत्वात् पीठे सर्वतोभद्रं विरच्य, तत्र

ब्रह्मादि–मंडल–देवताः आवाह्य, संपूज्य, तण्डुलैराच्छाद्य, तदुपरि कलशं संस्थाप्य, वरुणं संपूज्य, कर्णिकायां देवतास्थापनमिच्छन्ति,) **अष्टदले कर्णिकायां कृताग्न्युत्तारणपूर्विकायां सुवर्णप्रतिमायां तार–त्रिबीज–व्याहृति–संपुटित–त्रैयंबक–मंत्रेण महामृत्युंजयदेवतां स्थापयेत् (तारशब्दस्यार्थः ओंकारः) तद्यथा, त्र्यंबकं मैत्रावरुणिर्वसिष्ठो महामृत्युंजयस्त्रिष्टुप् । अस्यां सुवर्णमय्यां मूर्तौ महामृत्युंजयावाहने विनियोगः ।**

ॐ हौं जूं सः ॐ भूर्भुवः स्वः ।
ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं
उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥
ॐ स्वः भुवः भूः ॐ सः जूं हौं ॐ

(अ–५, अ–४, वर्ग–३०)

अस्यां सुवर्णमय्यां मूर्तौ प्रधानदेवतां महामृत्युंजयं सांगं सपरिवारं सायुधं सशक्तिकं आवाहयामि । ॐ भूः महामृत्युंजयं आवा॰ । ॐ भुवः महामृत्युंजयं आवा॰ । ॐ स्वः महामृत्युंजयं आवा॰ । ॐ भूर्भुवःस्वः महामृत्युंजयं आवा॰ । इति आवाह्य । परितः पूर्वादिक्रमेण पूगीफले विश्वेश्वराद्येकादशरुद्रावाहनं कुर्यात्-तथा- ॐ विश्वेश्वराय नमः विश्वेश्वरमावाहयामि । ॐ महादेवाय नमः । ॐ महादेवं आवाहयामि । ॐ विरूपाक्षाय नमः विरूपाक्षं आवाहयामि । ॐ सदाशिवाय नमः सदाशिवं आवाहयामि । ॐ त्र्यंबकाय नमः त्र्यंबकं आवाहयामि । ॐ त्रिपुरुषाय नमः त्रिपुरुषं आवाहयामि । ॐ रुद्राय नमः रुद्रं आवाहयामि । ॐ त्रिपुरान्तकाय नमः त्रिपुरान्तकं आवाहयामि । ॐ सर्वेश्वराय नमः सर्वेश्वरं आवाहयामि । ॐ शंकराय नमः शंकरं आवाहयामि । ॐ विश्वरूपाय नमः विश्वरूपं आवाहयामि । इत्येकादशरुद्रानावाह्य । पूजनसमये मंत्रपाठो यथापूर्वमदेव । ॐ हौं जूं सः॰ ॐ भूर्भुवः स्वः॰ ॐ त्र्यंबकं यजामहे॰ ॐ स्वः भुवः भूः ॐ सः जूं हौं ॐ । महामृत्युंजयाद्यावाहितदेवताभ्यो नमः । ध्यायामि । आसनार्थे अक्षतान् समर्पयामि । एवंरीत्या षोडशोपचारैः पूजयेत् । हवनसमयेऽपि एतादृशो मंत्रपाठः करणीयः ।

[illegible] उपयचेतिमंत्रेण सूर्यं स्थापयेत् । उपयचेत्यस्य काण्वः प्रस्कण्वः [illegible] । [illegible] विनियोगः ।

ॐ उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवं
हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥
(अ-१, अ-४, वर्ग-७)

ॐ भूर्भुवःस्वः । [illegible]पूगीफले (सुवर्णप्रतिमायां वा) सूर्याय नमः । सूर्यं [illegible] ।

[illegible] नाममंत्रेणावाह्य, एवं देवता-आवाहनोत्तरं सर्वासां [illegible]-त्रिवार-व्याहृति-संपुटित-त्र्यंबक-मंत्रेण ॐ महामृत्युंजयाद्यावाहित-[illegible] नमः । [illegible] समर्पयामि । एवंरीत्या षोडशोपचारपूजां कुर्यात् । [illegible] सकृत् रुद्रावर्तनम् । नमः सोमायेत्येकं वर्गं वा पठेत् । [illegible] (२८) अष्टाविंशति वारं जपं कृत्वा उत्तिष्ठेत् । स्थंडिला-[illegible], [illegible] संकल्पित-महामृत्युंजय-शांतिकर्मणि स्थंडिलादिसकलं [illegible] । [illegible] प्रतिष्ठाप्य, ध्यात्वा, ध्यानान्ते देवतोत्तरवेद्यां [illegible], संपूज्य, देवदानवसंवादे० इति वरुणप्रार्थनान्तं कृत्वा, [illegible], समिद्धयेत्यन्वादध्यात् । चक्षुष्यन्तं उक्त्वा प्रधानमन्वादध्यात् । [illegible]-व्याहृति-संपुटित-त्र्यंबकेति मृत्युंजय [illegible] चतुर्भिः द्रव्यैः प्रतिद्रव्यम् अष्टोत्तरसहस्र (१००८) [illegible] अष्टोत्तरशताहुतिभिर्वा (१०८) विश्वेश्वरादि-[illegible] अष्टाविंशति [illegible] वा । [illegible] २८ अष्टाविंशतिवारं [illegible], [illegible] २८ [illegible] । शेषेण स्विष्टकृतमिति चक्षुष्यन्तं [illegible] कृते, ग्रहहोमं प्रधानादिहोमं विधाय, स्विष्टकृतात् [illegible] कार्यः । तानि च सूक्तानि, श्रीसूक्तं, रुद्राध्यायं, आयुष्य-[illegible] । [illegible] एष वां देवा, परावतो सप्तदशार्च, आ नो भद्रा दशार्चं, [illegible] च सूक्तं पठेत् । ततः वेदपारायणं कार्यम् । तदसंभवे [illegible] च पठेत् । ततः स्विष्टकृतादि प्रायश्चित्त-होमान्ते

बलिदानं पूर्णाहुतिं च कृत्वा, संस्रावादिहोमशेषं समाप्य, स्थापितकलशोदकैः सकुटुंब बंधुवर्गयुतं यजमानं अभिषिंचेत् । तत्र अभिषेकमंत्राः—समुद्रज्येष्ठा० शं न इंद्राग्नी० परं मृत्यो० एष वां देवा० ऋग्द्वयं, परावतो सप्तदशार्चं, स्वादिष्टयेति दशार्चं, अक्षिभ्यां षट्भिः, यज्जाग्रत इति षण्णाम् । ग्रहमंत्र-मुख्यदेवतामंत्रेत्यादीनां सर्वेषां अभिषेके विनियोगः ।

(अभिषेकमंत्राणां बाहुल्यात् यथावकाशं यथाशक्ति पाठः ।)

ततो यजमानः अभिषेकवस्त्रं परित्यज्य, धृतशुक्लांबरः, अभिषेकवस्त्रं आचार्याय दद्यात् । विभूतिं धृत्वा आ नो भद्रा इति महाशांतिजपपूर्वकं देवतोत्तरपूजने कृते, मार्कंडेयादीन् प्रार्थयेत । ततः आयुर्वृद्धयै सतिलगुडसंमिश्रं दुग्धं प्राशयेत् । तत्र मंत्रः '**सतिलं गुडसंमिश्रं अंजल्यर्धमितं पयः । मार्कंडेयात् वरं लब्ध्वा पिबाम्या-युर्विवृद्धये ।**' इति पिबेत् । ततः कांस्यपात्रे घृतमासिच्य, तत्र 'रूपं रूपं' इति मंत्रेण आज्यावलोकनं कृत्वा, तत्पात्रं सदक्षिणाकं ब्राह्मणाय दत्वा, गो-भू-तिल-हिरण्यादि दशदानानि कानिचित् प्रत्यक्षाणि, कानिचित् निष्क्रयद्वारा, सर्वाणि वा निष्क्रयरूपेण ब्राह्मणेभ्यो दत्वा, तथा शतगुंजापरिमितं सुवर्णं, तन्निष्क्रयं वा त्रिभज्य विभज्य ब्राह्मणेभ्यो दत्वा, अशक्तौ शतसर्षपतुलितं वा ततः विसर्जितदेवतापीठदानान्ते तिलदानं च कृत्वा, तत्र मंत्रः 'तिलाः कश्यपसंभूतास्तिलाः पापहराः शुभाः । तिलपात्रप्रदानेन अतः शान्तिं प्रयच्छ मे ॥' इति । पुत्रादिकैः पुष्पमालावस्त्रादिना यजमानं (अहेर) सत्कृत्य, पुरंध्रीभिः (सुवासिनीभिः) आचारात् यजमानस्य यावन्ति वयोवर्षाणि तावद्भिर्वा नीराजनैः (दीपैः) नीराजयित्वा, ब्राह्मणेभ्यः दक्षिणां दत्वा, तेभ्यः आशीर्वचनं गृहीत्वा, ब्राह्मणभोजनसंकल्पं कृत्वा, देवानभिवाद्य, कर्म परमेश्वरार्पणं कुर्यात् । द्विराचम्य, त्रिवारं विष्णुस्मरणं कुर्यात् इति ।

॥ इति प्राचीनग्रंथानुसारं नारायणशास्त्री जोशी-विरचिता
महामृत्युंजय-शान्तिः समाप्ता ।

॥ श्रीकृष्णार्पणमस्तु ॥

वयोऽवस्थामाने विपदपहृतौ वीथिकथनं
कृतं धर्मग्रन्थैः समुचितविधिन्याससहितम् ।
तथाचारं कृण्वन् परमसुखमाप्नोति पुरुषः
परं श्रद्धायुक्तं यदि भवति कर्मप्रकरणम् ॥

न सर्वे मन्त्रा वा न हि सदुपचारास्तदथ वा
न पूजासामग्री न हि सकलदेवर्षिसमितिः ।
न चोपाध्यायो वा न हि च यजमानोऽपि धनिको
विना श्रद्धां किंचित् फलमिह लमेतात्मकृतितः ॥

मनो येषां शुद्धं विगतमलमेति व्रतयुतं
तथा च सश्रद्धं गतसकलसंशीतिशकलम् ।
कृता शान्तिस्तैश्च प्रकटविधिपूजादिसहिता
भवेन्नित्यं भोक्तुर्नियतिविहितं सौख्यमखिलम् ॥

शान्तिर्वयोमानगता प्रसिद्धा
सर्वोपचारैः परिपूर्णशोभा ।
विघ्नेश्वरस्यात्र कृपाप्रसादैः
भूयाद् धरण्यां यजमानवृद्ध्यै ॥

वयोऽवस्थाभिधः शान्तिसमुच्चय इतः कृतः ।
सर्वेषां शान्तिकर्तॄणां मंगलाय चिरं भवेत् ॥

श्रीरामः ।

ब्रह्मादि मंडळ देवता

१) ब्रह्मणे नमः ।
२) सोमाय नमः ।
३) ईशानाय नमः ।
४) इन्द्राय नमः ।
५) अग्नये नमः ।
६) यमाय नमः ।
७) निर्ऋतये नमः ।
८) वरुणाय नमः ।
९) वायवे नमः ।
१०) अष्टवसुभ्यो नमः ।
११) एकादशरुद्रेभ्यो नमः ।
१२) द्वादशादित्येभ्यो नमः ।
१३) अश्विभ्यां नमः ।
१४) विश्वेभ्यो देवेभ्यो नमः ।
१५) सप्तयक्षेभ्यो नमः ।
१६) सर्पेभ्यो नमः ।
१७) गंधर्वाप्सरोभ्यो नमः ।
१८) स्कंदाय नमः ।
१९) नंदीश्वराय नमः ।
२०) शूलाय नमः ।
२१) महाकालाय नमः ।
२२) दक्षाय नमः ।
२३) दुर्गायै नमः ।
२४) विष्णवे नमः ।
२५) स्वधायै नमः ।
२६) मृत्युरोगेभ्यो नमः ।
२७) गणपतये नमः ।
२८) अद्भ्यो नमः ।
२९) मरुद्भ्यो नमः ।
३०) भूम्यै नमः ।
३१) गंगादिनदीभ्यो नमः ।
३२) सप्तसागरेभ्यो नमः ।
३३) मेरवे नमः ।
३४) गदायै नमः ।
३५) त्रिशुलाय नमः ।
३६) वज्राय नमः ।
३७) शक्तये नमः ।
३८) दंडाय नमः ।
३९) खड्गाय नमः ।
४०) पाशाय नमः ।
४१) अंकुशाय नमः ।
४२) गौतमाय नमः ।
४३) भरद्वाजाय नमः ।
४४) विश्वामित्राय नमः ।
४५) कश्यपाय नमः ।
४६) जमदग्नये नमः ।
४७) वसिष्ठाय नमः ।
४८) अत्रये नमः ।
४९) अरुंधत्यै नमः ।
५०) ऐंद्र्यै नमः ।
५१) कौमार्यै नमः ।
५२) ब्राह्म्यै नमः ।
५३) वाराह्यै नमः ।
५४) चामुण्डायै नमः ।
५५) वैष्णव्यै नमः ।
५६) माहेश्वर्यै नमः ।
५७) वैनायक्यै नमः ।
५८) असितांगभैरवाय नमः ।
५९) रुरु भैरवाय नमः ।
६०) चंड भैरवाय नमः ।
६१) क्रोध भैरवाय नमः ।
६२) उन्मत्त भैरवाय नमः ।
६३) कपाल भैरवाय नमः ।
६४) भीषण भैरवाय नमः ।
६४) संहार भैरवाय नमः ।

सप्तचिरंजीव-प्रार्थना-श्लोकाः ।

मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरारोग्यमैश्वर्यं देहि मे मुनिपुंगव ॥ १ ॥
द्रौणे मे त्वं महाभाग रुद्रतेजःसमुद्भव ।
आयुर्बलं यशो देहि अश्वत्थामन् नमोऽस्तु ते ॥ २ ॥
दैत्येन्द्रकुलसंभूत यज्ञदानक्रियारत ।
बले त्वां शरणं यामि दीर्घायुष्यं प्रयच्छ मे ॥ ३ ॥
वसिष्ठकुलसंभूत वेदशास्त्रविशारद ।
नारायणांशसंभूत वेदव्यास नमोऽस्तु ते ॥ ४ ॥
अंजनीगर्भसंभूत कपीन्द्र सचिवोत्तम ।
रामप्रिय नमस्तुभ्यं हनुमन् रक्ष मां सदा ॥ ५ ॥
विभीषण नमस्तुभ्यं रामपादाब्जपूजक ।
आयुरारोग्यमैश्वर्यं देहि पौलस्त्यनंदन ॥ ६ ॥
द्विजेन्द्र भरताचार्य सर्वविद्याविशारद ।
शरणं त्वां प्रपन्नोऽस्मि कृप मां रक्ष सर्वदा ॥ ७ ॥
रेणुकेय महाभाग कार्तवीर्यकृतान्तक ।
आयुः प्रयच्छ मे राम जामदग्न्य नमोऽस्तु ते ॥ ८ ॥
इति ।

अभिषेकोत्तरं सर्वासु शान्तिषु अन्ते यजमानेन पठनीयाः सप्तचिरंजीवप्रार्थनाश्लोकाः ।

हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य आनंदकर्दमचिक्लीतेंदिरासुता ऋषयः । श्रीर्देवता । आद्यास्तिस्रोऽनुष्टुभः । चतुर्थी बृहती पंचमीषष्ठ्यौ त्रिष्टुभौ । ततोऽष्टावनुष्टुभः । अंत्या प्रस्तारपंक्तिः ।

हरिः ॐ हिरण्यवर्णांहरिणींसुवर्णरजतस्रजाम् ॥ चंद्रांहिरण्मयींलक्ष्मींजातवेदोमआवह ॥ तांमआवहजातवेदोलक्ष्मीमनपगामिनीम् ॥ यस्यांहिरण्यंविंदेयंगामश्वंपुरुषानहम् ॥ अश्वपूर्वांरथमध्यांहस्तिनादप्रबोधिनीम् ॥ श्रियंदेवीमुपह्वयेश्रीर्मादेवीजुषताम् ॥ कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलंतींतृप्तांतर्पयंतीम् ॥ पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियम् ॥ चंद्रांप्रभासांयशसाज्वलंतींश्रियंलोकेदेवजुष्टामुदाराम् ॥ तांपद्मिनीमींशरणमहंप्रपद्येऽलक्ष्मीर्मेनश्यतांत्वांवृणे ॥ १ ॥ आदित्यवर्णेतपसोधिजातोवनस्पतिस्तववृक्षोथबिल्वः ॥ तस्यफलानितपसानुदंतुमायांतरायाश्चबाह्याअलक्ष्मीः ॥ उपैतुमांदेवसखःकीर्तिश्चमणिनासह ॥ प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे ॥ क्षुत्पिपासामलांज्येष्ठामलक्ष्मींनाशयाम्यहम् ॥ अभूतिमसमृद्धिंचसर्वांनिर्णुदमेगृहात् ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम् ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम् ॥ मनसःकाममाकूतिंवाचःसत्यमशीमहि ॥ पशूनांरूपमन्नस्यमयिश्रीःश्रयतांयशः ॥ २ ॥ कर्दमेनप्रजाभूतामयिसंभवकर्दम ॥ श्रियंवासयमेकुलेमातरंपद्म

मालिनीम् ॥ आपः स्रजंतुस्निग्धानिचिक्लीतवसमेगृहे ॥
निचदेवींमातरंश्रियंवासयमेकुले ॥ आर्द्रांपुष्करिणींपुष्टिं
सुवर्णांहेममालिनीम् ॥ चन्द्रांहिरण्मयींलक्ष्मींजातवेदोम
आवह ॥ आर्द्रांयः करिणींयष्टिंसुवर्णांहेममालिनीम् ॥
सूर्यांहिरण्मयींलक्ष्मींजातवेदोमआवह ॥ तांमआवहजात
वेदोलक्ष्मीमनपगामिनीं ॥ यस्यांहिरण्यंप्रभूतंगावोदास्यो
श्वान्विंदेयंपुरुषानहम् ॥ ३ ॥ अ० ४ अ० ४ परि०

रुद्राध्यायः न अत्र मुद्रितः सर्वेषां परिचितत्वात् ।
तस्मात् नमकश्चमकेति रुद्राध्यायः अत्र पठनीयः ॥
अथ वा नमः सोमाय० शं चमेति वर्गद्वयं पठेत् ।

एष वां देवावितिद्वयोर्वामदेवाश्विनौ गायत्री ।

हरिः ॐ एषवांदेवावश्विनाकुमारःसाहदेव्यः ।
दीर्घायुरस्तुसोमकः ॥ तंयुवंदेवावश्विनाकुमारंसाहदेव्यं ।
दीर्घायुषंकृणोतन ॥ १६ ॥ अ० ३ अ० ५ वर्ग १६

परावतो य इति सप्तदशर्चस्य सूक्तस्य गयो विश्वेदेवा जगत्यन्त्ये त्रिष्टुभौ ।

हरिः ॐ परावतोयेदिधिषंतऽआप्यंमनुप्रीतासोजनि
माविवस्वतः । ययातेर्येनहुष्यस्यबर्हिषिदेवाऽआसतेतेऽ
अधिब्रुवंतुनः ॥ विश्वाहिवोनमस्यानिवंद्यानामानिदेवाऽ
उतयज्ञियानिवः । येस्थजाताऽअदितेरद्भ्यस्परियेपृथिव्या

स्तेमऽइहश्रुताहवं ॥ येभ्योमातामधुमत्पिन्वतेपयःपीयूषं
द्यौरदितिरद्रिबर्हाः । उक्थशुष्मान्वृषभरान्त्स्वप्नसस्ताँऽ
आदित्याँऽअनुमदास्वस्तये ॥ नृचक्षसोऽअनिमिषंतोऽ
अर्हणाबृहद्देवासोऽअमृतत्वमानशुः । ज्योतीरथाऽअहि
मायाऽअनागसोदिवोवर्ष्माणंवसतेस्वस्तये ॥ सम्राजोये
सुवृधोयज्ञमाययुरपरिह्वृतादधिरेदिविक्षयं । ताँऽआविवा
सनमसासुवृक्तिभिर्महोऽआदित्याँऽअदितिंस्वस्तये ॥ ३ ॥

कोवस्तोमंराधतियंजुजोषथविश्वेदेवासोमनुषोयतिष्ठन ।
कोवोध्वरंतुविजाताऽअरंकरद्योनःपर्षदत्यंहःस्वस्तये ॥
येभ्योहोत्रांप्रथमामायेजेमनुःसमिद्धाग्निर्मनसासप्तहो
तृभिः । तऽआदित्याऽअभयंशर्मयच्छतसुगानःकर्तसुपथा
स्वस्तये ॥ यऽईशिरेभुवनस्यप्रचेतसोविश्वस्यस्थातुर्ज
गतश्चमंतवः । तेनःकृतादकृतादेनसस्पर्यद्यादेवासःपिपृ
तास्वस्तये ॥ भरेष्विंद्रंसुहवंहवामहेंहोमुचंसुकृतंदैव्यंजनं ।
अग्निंमित्रंवरुणंसातयेभगंद्यावापृथिवीमरुतःस्वस्तये ॥
सुत्रामाणंपृथिवींद्यामनेहसंसुशर्माणमदितिंसुप्रणीतिं ।
दैवींनावंस्वरित्रामनागसमस्रवंतीमारुहेमास्वस्तये ॥ ४ ॥

विश्वेयजत्राऽअधिवोचतोतयेत्रायध्वंनोदुरेवायाऽ
अभिह्रुतः । सत्ययावोदेवहूत्याहुवेमशृण्वतोदेवाऽअवसे
स्वस्तये ॥ अपामीवामपविश्वामनाहुतिमपारातिंदुर्विदत्रा

मघायतः । आरेदेंवाद्वेषोऽअस्मद्युयोतनोरुणःशर्मयच्छता
स्वस्तये ॥ अरिष्टःसमर्तोविश्वऽएधतेप्रप्रजाभिर्जायते
धर्मणस्परि । यमादित्यासोनयथासुनीतिभिरतिविश्वानि
दुरितास्वस्तये ॥ यंदेवासोवथवाजसातौयंशूरसातामरुतो
हितेधने । प्रातर्यावाणंरथमिंद्रसानसिमरिष्यंतमारुहेमा
स्वस्तये ॥ स्वस्तिनःपथ्यासुधन्वसुस्वस्त्य१प्सुवृजने
स्ववंति । स्वस्तिनःपुत्रकृथेषुयोनिषुस्वस्तिरायेमरुतो
दधातन ॥ स्वस्तिरिद्धिप्रपथेश्रेष्ठारेक्णस्वत्यभियावा
ममेति । सानोऽअमासोऽअरणेनिपातुस्वावेशाभवतुदेव
गोपा ॥ एवाप्लुतेःसूनुरवीवृधद्वोविश्वऽआदित्याऽअदितेम
नीषी । ईशानासोनरोऽअमर्त्येनास्ताविजनोदिव्यो
गयेन ॥ ५ ॥ अ० ८ अ० २ वर्ग ३–४–५

आ नो भद्रा इति दशर्चस्य सूक्तस्य गोतमो राहुगणो विश्वेदेवा जगती षष्ठी विराट्–स्थाना अंत्यास्तिस्त्रस्त्रिष्टुभः ।

हरि : ॐ आनोभद्राःक्रतवोयंतुविश्वतोदब्धासोअपरी
तासउद्भिदः ॥ देवानोयथासदमिद्वृधेअसन्नप्रायुवोरक्षि
तारोदिवेदिवे ॥ देवानांभद्रासुमतिर्ऋजूयतांदेवानांरातिर
भिनोनिवर्ततां ॥ देवानांसख्यमुपसेदिमावयंदेवानआयुः
प्रतिरंतुजीवसे ॥ तान्पूर्वयानिविदाहूमहेवयंभगंमित्र
मदितिंदक्षमस्त्रिधं । अर्यमणंवरुणंसोममश्विनासरस्व

तीनःसुभगामयस्करत् ॥ तन्नोवातोमयोभुवातुभेषजं
तन्मातापृथिवीतत्पिताद्यौः ॥ तद्ग्रावाणःसोमसुतोमयो
भुवस्तदश्विनाशृणुतंधिष्ण्यायुवं ॥ तमीशानंजगतस्तस्थु
षस्पतिंधियंजिन्वमवसेहूमहेवयं ॥ पूषानोयथावेदसाम
सद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ १ ॥ स्वस्तिनइंद्रोवृद्ध
श्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्ट
नेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ पृषदश्वामरुतःपृश्नि
मातरःशुभंयावानोविदथेषुजग्मयः ॥ अग्निजिह्वामनवः
सूरचक्षसोविश्वेनोदेवाऽअवसागमन्निह ॥ भद्रंकर्णेभिः
श्रृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवां
सस्तनूभिर्व्यशेमदेवहितंयदायुः ॥ शतमिन्नुशरदोअंति
देवायत्रानश्चक्राजरसंतनूनां ॥ पुत्रासोयत्रपितरोभवंति
मानोमध्यारीरिषतायुर्गंतोः ॥ अदितिर्द्यौरदितिरंतरिक्षम
दितिर्मातासपितासपुत्रः ॥ विश्वेदेवाअदितिःपंचजना
अदितिर्जातमदितिर्जनित्वं ॥ २ ॥ अ० १ अ० ६ वर्ग १५–१६

इति वा इति त्र्यो दशर्चस्य सूक्तस्य ऐंद्रो लव आत्मा स्तुतिर्गायत्री ।

हरिः ॐ इतिवाइतिमेमनोगामश्वंसनुयामिति ॥
कुवित्सोमस्यापामिति ॥ प्रवाताइवदोधतउन्मापीताऽ
अयंसत ॥ कुवित्सोमस्यापामिति ॥ उन्मापीताअयंसत
रथमश्वाइवाशवः ॥ कुवित्सोमस्यापामिति ॥ उपमा

मतिरस्थितवाश्वापुत्रमिवप्रियं ॥ कुवित्सोमस्यापामिति ॥
अहंतष्टेववंधुरंपर्यचामिहृदामतिं ॥ कुवित्सोमस्यापा
मिति॥ नहिमेऽअक्षिपच्चनाच्छान्त्सुःपंचकृष्टयः॥कुवित्सो
मस्यापामिति ॥१॥ नहिमेरोदसीउभेऽअन्यंपक्षंचनप्रति ॥
कुवित्सोमस्यापामिति ॥ अभिद्यांमहिनाभुवमभी३मां
पृथिवींमहीं ॥ कुवित्सोमस्यापामिति ॥ हंताहंपृथिवी
मिमांनिदधानीहवेहवा ॥ कुवित्सोमस्यापामिति ॥ ओष
मित्पृथिवीमहंजंघनानीहवेहवा॥ कुवित्सोमस्यापामिति॥
दिविमेअन्यःपक्षो३धोऽअन्यमचीकृषं ॥ कुवित्सोमस्यापा
मिति ॥ अहमस्मिमहामहोभिनभ्यमुदीषितः ॥ कुवित्सो
मस्यापामिति ॥ गृहोयाम्यरंकृतोदेवेभ्योहव्यवाहनः ॥
कुवित्सोमस्यापामिति ॥ २ ॥ अ० ८ अ० ६ वर्ग २६–२७

आयुष्यमिति सूक्तस्य सनक-सनंदन-सनातनादयो ऋषयः हिरण्यं देवता आद्याश्चतस्रोऽनुष्टुभः पंचमी त्रिष्टुप् षष्ठ्यनुष्टुप् सप्तम्यतिशक्वरी अष्टमी-नवम्यौ त्रिष्टुभौ दशम्यनुष्टुबेकादशी पंक्तिः। सर्वेषां पठणे श्रवणे विनियोगः।

हरिः ॐ आयुष्यंवर्चस्यंरायस्पोषमौद्भिदं ॥ इदं
हिरण्यंवर्चस्वज्जैत्रायाविशतादिमाम् ॥ उच्चैर्वाजीपृत
नाषाट्सभासाहंधनञ्जयं ॥ सर्वाःसमग्राऋद्धयोहिरण्ये
स्मिन्समाहिताः ॥ शुनमहंहिरण्यस्यपितुर्मानेवजग्रभ ॥

तेनमांसूर्यत्वचमकरंपुरुषुप्रियं ॥ सम्राजंचविराजंचाभि
ष्टिर्याचमेध्रुवा ॥ लक्ष्मीराष्ट्रस्ययामुखेतयामामिंद्र
संसृज ॥ अग्नेःप्रजातंपरियद्धिरण्यममृतंजज्ञेअधिमर्त्येषु ॥
यएनद्वेदसइदेनमर्हतिजरामृत्युर्भवतियोबिभर्ति ॥ १ ॥
यद्वेदराजावरुणोयदुदेवीसरस्वती ॥ इंद्रोयद्वृत्रहावेदतन्मे
वर्चसआयुषे ॥ नतद्रक्षांसिनपिशाचास्तरंतिदेवानामोजः
प्रथमजंह्ये३तत् ॥ योबिभर्तिदाक्षायणाहिरण्यंसदेवेषु
कृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः ॥ यदाबध्नन्दा
क्षायणाहिरण्यंशतानीकायसुमनस्यमाना ॥ तन्नआबध्ना
मिशतशारदायायुष्मान्जरदष्टिर्यथासत् ॥ घृतादुल्लुप्तं
मधुमत्सुवर्णंधनञ्जयंधरुणंधारयिष्णु ॥ ऋणक्सपत्नाद
धरांश्चकृण्वदारोहमांमहतेसौभगाय ॥ प्रियंमाकुरुदेवेषु
प्रियंराजसुमाकुरु॥ प्रियंविश्वेषुगोप्त्रेषुमयिधेहिरुचारुचं॥
अग्निर्येनविराजतिसूर्योयेनविराजति॥ विराज्येनविराजति
तेनास्मान्ब्रह्मणस्पतेविराजसमिधंकुरु ॥
अ०८ अ० ७ परि०

सहस्रशीर्षेतिषोडशर्चस्य सूक्तस्य नारायणः पौरुषमानुष्टुभं त्रिष्टुभन्त्या ।

हरिः ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥
सभूमिंविश्वतोवृत्वाऽत्यतिष्ठद्दशांगुलम् ॥ पुरुषएवेदंसर्वं
यद्भूतंयच्चभव्यम् ॥ उतामृतत्वस्येशानोयदन्नेनाति
रोहति ॥ एतावानस्यमहिमातोज्यायांश्चपूरुषः ॥ पादोस्य
विश्वाभूतानित्रिपादस्यामृतंदिवि ॥ त्रिपादूर्ध्वउदैत्पुरुषः
पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनान
शनेअभि ॥ तस्माद्विराळजायतविराजोअधिपूरुषः ॥
सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ १ ॥ यत्पुरुषेणह
विषादेवायज्ञमतन्वत ॥ वसंतोअस्यासीदाज्यंग्रीष्मइध्मः
शरद्धविः ॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेन
देवाअयजंतसाध्याऋषयश्चये ॥ तस्माद्यज्ञात्सर्वहुतः
संभृतंपृषदाज्यम् ॥ पशून्ताँश्चक्रेवायव्यानारण्यान्
ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे ॥
छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ तस्मादश्वा
अजायंतयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जा
ताअजावयः ॥ २ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥
मुखंकिमस्यकौबाहूकाऊरूपादाउच्येते ॥ ब्राह्मणोस्य
मुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्यां
शूद्रोअजायत ॥ चंद्रमामनसोजातश्चक्षोःसूर्योअजायत ॥

मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥ नाभ्याआसीदंत
रिक्षंशीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथा
लोकाँअकल्पयन् ॥ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधः
कृताः ॥ देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुम् ॥ यज्ञेन
यज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकं
महिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥ ३ ॥

अ० ८ अ० ४ वर्ग १७

अग्निमीळे इति वर्गद्वयस्य मधुच्छंदा अग्निर्गायत्री श्रवणे पठने विनियोगः ।

हरिः ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम् ॥
होतारंरत्नधातमम् ॥ अग्निःपूर्वेभिर्ऋषिभिरीड्योनूत
नैरुत ॥ सदेवाँऽएहवक्षति ॥ अग्निनारयिमश्नवत्पोषमेव
दिवेदिवे ॥ यशसंवीरवत्तमम् ॥ अग्नेयंयज्ञमध्वरंविश्वतः
परिभूरसि ॥ सऽइद्देवेषुगच्छति ॥ अग्निर्होताकविक्रतुः
सत्यश्चित्रश्रवस्तमः ॥ देवोदेवेभिरागमत् ॥ १ ॥ यदंग
दाशुषेत्वमग्नेभद्रंकरिष्यसि ॥ तवेत्तत्सत्यमंगिरः ॥ उपत्वाग्ने
दिवेदिवेदोषावस्तर्धियावयम् ॥ नमोभरंतऽएमसि ॥
राजंतमध्वराणांगोपामृतस्यदीदिविम् ॥ वर्धमानंस्वेदमे ॥
सनःपितेवसूनवेऽग्नेसूपायनोभव ॥ सचस्वानःस्वस्तये ॥ २ ॥

अ० १ अ० १ वर्ग १-२

समुद्रज्येष्ठा इति चतसृणां वसिष्ठ आपस्त्रिष्टुप् । त्रायन्तामिति तिसृणां सप्तर्षय आपोऽनुष्टुप् । इमा आप इति तिसृणामैतरेय अपोनुष्टुब्जगत्यनुष्टुभः ।

हरिः ॐ समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत्यनिविशमानाः ॥ इंद्रोयावज्रीवृषभोरराद ताआपोदेवीरिहमामवंतु ॥ याआपोदिव्याउतवास्त्रवंतिखनित्रिमाउतवायाःस्वयंजाः ॥ समुद्रार्थायाःशुचयःपावकास्ताआपोदेवीरिहमामवंतु ॥ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां ॥ मधुश्चुतःशुचयोयाःपावकास्ताआपोदेवीरिहमामवंतु ॥ यासुराजावरुणोयासुसोमोविश्वेदेवायासूर्जंमदंति ॥ वैश्वानरोयास्वग्निःप्रविष्टस्ताआपोदेवीरिहमामवंतु ॥ त्रायंतामिहदेवास्त्रायतांमरुतांगणः ॥ त्रायंतांविश्वाभूतानियथायमरपाअसत् ॥ आपइद्वाउभेषजीरापोअमीवचातनीः ॥ आपःसर्वस्यभेषजीस्तास्तेकृण्वंतुभेषजं ॥ हस्ताभ्यांदशशाखाभ्यांजिह्वावाचःपुरोगवी ॥ अनामयित्नुभ्यांत्वाताभ्यांत्वोपस्पृशामसि ॥ इमाआपःशिवतमाइमाःसर्वस्यभेषजीः ॥ इमाराष्ट्रस्यवर्धनीरिमाराष्ट्रभृतोमृताः ॥ याभिरिंद्रमभ्यषिंचत्प्रजापतिःसोमंराजानंवरुणंयमंमनुं ॥ ताभिरद्भिरभिषिंचामित्वामहंराज्ञांत्वमधिराजोभवेह ॥ महांतंत्वामहीनांसम्राजंचर्षणीनांदेवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत् ॥

अ० ५ अ० ४ वर्ग १६

शं न इंद्राग्नी इति पंचदशर्चस्य सूक्तस्य वसिष्ठो विश्वेदेवास्त्रिष्टुप् ।

हरिः ॐ शंनऽइंद्राग्नीभवतामवोभिःशंनऽइंद्रावरुणारातहव्या । शमिंद्रासोमासुवितायशंयोःशंनऽइंद्रापूषणावाजसातौ ॥ शंनोभगःशमुनःशंसोऽअस्तुशंनःपुरंधिःशमुसंतुरायः । शंनःसत्यस्यसुयमस्यशंसःशंनोऽअर्यमापुरुजातोऽअस्तु ॥ शंनोधाताशमुधर्तानोऽअस्तुशंनऽउरूचीभवतुस्वधाभिः । शंरोदसीबृहतीशंनोऽअद्रिःशंनोदेवानांसुहवानिसंतु ॥ शंनोऽअग्निर्ज्योतिरनीकोऽअस्तुशंनोमित्रावरुणावश्विनाशं । शंनःसुकृतांसुकृतानिसंतुशंनऽइषिरोऽअभिवातुवातः ॥ शंनोद्यावापृथिवीपूर्वहूतौशमंतरिक्षंदृशयेनोऽअस्तु । शंनऽओषधीर्वनिनोभवंतुशंनोरजसस्पतिरस्तुजिष्णुः ॥ २८ ॥ शंनऽइंद्रोवसुभिर्देवोऽअस्तुशमादित्येभिर्वरुणःसुशंसः ॥ शंनोरुद्रोरुद्रेभिर्जलाषःशंनस्त्वष्टाग्नाभिरिहशृणोतु ॥ शंनःसोमोभवतुब्रह्मशंनःशंनोग्रावाणःशमुसंतुयज्ञाः । शंनःस्वरूणांमितयोभवंतुशंनःप्रस्व१ःशम्वस्तुवेदिः ॥ शंनःसूर्यऽउरुचक्षाऽउदेतुशंनश्चतस्त्रःप्रदिशोभवंतु । शंनःपर्वताध्रुवयोभवंतुशंनःसिंधवःशमुसंत्वापः ॥ शंनोऽअदितिर्भवतुव्रतेभिःशंनोभवंतुमरुतःस्वर्काः । शंनोविष्णुःशमुपूषानोऽअस्तुशंनोभवित्रंशम्वस्तुवायुः ॥ शंनोदेवःसवितात्राय

मंल्लोगंनिद्धन्मोऽअहंरिषं । एतांस्थूणांपितरोधारयंतु
तेत्रायमःसादनातेमिनोतु ॥ प्रतीचीनेमामहनीष्वाःपर्ण
मिवादधुः । प्रतीचींजग्रभावाचमश्वंरशनयायथा ॥२८॥

अ० ७ अ० ६ वर्ग २६–२७–२८

एष वां देवाइति द्वे पठेत्।

परावतो य इति सप्तदशर्चं पठेत्।

स्वादिष्ठयेति दशर्चस्य सूक्तस्य मधुच्छन्दाः पवमानसोमः गायत्री।

हरिः ॐ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया ॥
इंद्रायपातवेसुतः॥ रक्षोहाविश्वचर्षणिरभियोनिमयोहतं॥
द्रुणासधस्थमासदत् ॥ वरिवोधातमोभवमंहिष्ठोवृत्र
हन्तमः ॥ पर्षिराधोमघोनां ॥ अभ्यर्षमहानांदेवानांवीति
मंधसा ॥ अभिवाजमुतश्रवः ॥ त्वामच्छाचरामसितदि
दर्थंदिवेदिवे ॥ इंदोत्वेनऽआशसः ॥ १ ॥ पुनातितेपरिस्रु
तंसोमंसूर्यस्यदुहिता ॥ वारेणशश्वतातना ॥ तमीमण्वीः
समर्यऽआगृभ्णंतियोषणोदश ॥ स्वसारःपार्येदिवि ॥
तमींहिन्वंत्यग्रुवोधमंतिबाकुरंद्दतिं ॥ त्रिधातुवारणंमधु ॥
अभीइममघ्न्याऽउतश्रीणंतिधेनवःशिशुं ॥ सोममिंद्राय
पातवे ॥ अस्येदिंद्रोमदेष्वाविश्वावृत्राणिजिघ्नते ॥
शूरोमघाचमंहते ॥ २ ॥

अ० ६ अ० ७ वर्ग १६

अक्षिभ्यामिति षड्ऋचं काश्यपो विवृहा यक्ष्मघ्नी अनुष्टुप् ॥ ६ ॥

हरिः ॐ अक्षीभ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुका
दधि। यक्ष्मंशीर्षण्यंमस्तिष्काज्जिह्वायाविवृहामिते॥ ग्रीवा
भ्यस्तऽउष्णिहाभ्यःकीकसाभ्योऽअनूक्यात् । यक्ष्मंदो
षण्य१मंसाभ्यांबाहुभ्यांविवृहामिते॥ आंत्रेभ्यस्तेगुदाभ्यो
वनिष्ठोर्हृदयादधि । यक्ष्मंमतस्नाभ्यांयक्नःप्लाशिभ्यो
विवृहामिते॥ ऊरुभ्यांतेऽअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां।
यक्ष्मंश्रोणिभ्यांभासदाद्भंससोविवृहामिते ॥ मेहनाद्वनं
करणाल्लोमभ्यस्तेनखेभ्यः । यक्ष्मंसर्वस्मादात्मनस्तमिदं
विवृहामिते ॥ अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि ।
यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ॥ २१ ॥

यज्जाग्रत इति षण्णां शिवसंकल्पमंत्राणां प्रजापतिर्मनस्त्रिष्टुप् । सर्वेषां अभिषेके विनियोगः।

हरिः ॐ यज्जाग्रतोदूरमुदैतुदैवंतदुसुप्तस्यतथैवैति ॥
दूरंगमंज्योतिषांज्योतिरेकंतन्मेमनःशिवसंकल्पमस्तु ॥
येनकर्माण्यपसोमनीषिणोयज्ञेकृण्वंतिविदथेषुधीराः ॥
यदपूर्वंयक्ष्ममंतःप्रजानांतन्मेमनःशिवसंकल्पमस्तु ॥
यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरंतरमृतंप्रजासु ॥ यस्मान्न
ऋतेकिंचनकर्मक्रियतेतन्मेमनःशिवसंकल्पमस्तु ॥ येनेदं
भूतंभुवनंभविष्यत्परिगृहीतममृतेनसर्वं॥ येनयज्ञस्तायते

सप्तहोतातन्मेमनःशिवसंकल्पमस्तु ॥ यस्मिन्नृचःसाम
यजूंꣳषियस्मिन्प्रतिष्ठितारथनाभाविवाराः ॥ यस्मिंꣳ
श्चित्तꣳसर्वमोतंप्रजानांतन्मेमनःशिवसंकल्पमस्तु ॥ सुषार
थिरश्वानिवयंमनुष्यान्नेनीयतेभीशुभिर्वाजिनइव ॥ हृत्प्र
तिष्ठंयदजिरंयविष्ठंतन्मेमनःशिवसंकल्पमस्तु ॥

आज्यावलोकन–मंत्रः ।

रूपंरूपमित्यस्य भारद्वाजो गर्ग इंद्रस्त्रिष्टुप् ।
मुखावलोकने विनियोगः ।

वैदिकमंत्रः ।
ॐ रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥
(अ–४, अ–७, वर्ग–३३)

पुराणमंत्रः ।
आज्यं तेजः समुद्दिष्टं, आज्यं पापहरं स्मृतम् ।
आज्यं सुराणामाहार आज्ये देवाः प्रतिष्ठिताः ॥ इति ॥

卐卐卐卐卐卐卐卐卐卐